न च वाच्यासिध्यङ्गम् अत्र काकुः—वाच्यसिद्धि, as seen above, means completion of sense by bringing about coherence' काकुः here means the व्यङ्ग्य due to काकु. viz. मयि खेदः न योग्यः कुरुषु तु योग्यः

प्रश्नमात्रेणापि काकोर्विश्रान्तेः [झळकीकर construes काकोः with प्रश्नमात्रेणापि meaning काकुव्यङ्ग्येन प्रश्नमात्रेणः Unnecessary.] The काकु can in the instance under consideration, yield a complete idea (विश्रान्ति) even supposing its outcome to be a mere query. So far as the वाच्यार्थ is concerned, the काकु contributes to it by the interrogation-effect it produces, for नाद्यापि कुरुषु with an emphasis is=कुरुषु नाद्यापि किम्. And this interrogation leaves nc आकांक्षा, making the वाच्यार्थ complete in itself. Hence the व्यङ्ग्यार्थ which is the ulterior effect of the काकु—मयि न योग्यः etc,—is independent of the वाच्यार्थ. And this makes the काव्य a ध्वनि.

Amended Tr. *Since the stress is consummated with the bare query.*

४ वाक्यवैशिष्ट्य :—Sometimes a statement itself is such that, though complete in itself, it leaves room for suggestion. Not that all वाक्यs possess such वैशिष्ट्य to be suggestive of a further sense.

St. 16 *Sk. Rendering.*

तदा मम गण्डस्थलनिमितां दृष्टिं न नयासि अन्यतः।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः॥

निमितां directed, riveted upon. This illustrates वाच्यार्थस्य व्यञ्जकत्व due to वाक्यवैशिष्ट्य.

The words are spoken by a नायिका to the नायक whose attitude during the present meeting she contrasts with that during the last meeting. During the last meeting, the नायक looked with an intent gaze at the नायिका's cheeks. During the present meeting, though the cheeks continue to be the same and the नायिका the same, the gaze has disappeared.

The statement is sufficiently striking to leave us curious, and we ask ourselves: "What is it that has wrought this change in the नायक?" We compare the two meetings, and find that whereas in the former, another lady उपनायिका was present, in the present she is absent. Since all other circumstances in this meeting are the same as those in the last, we naturally jump to the conclusion, that this change in attitude is due to the absence of the उपनायिका. During the last meeting, the उपनायिका was reflected in the cheeks of the नायिका, this time she is not. And this accounts for the absence of gaze, even when all other circumstances are the same. As soon as we come to this conclusion, we see how the नायिका means to *suggest* to the नायक that he has been slyly loving the उपनायिका. And this is the suggestion.

Note that here though it is the वाक्यवैशिष्ट्य that leads to suggestion, yet the वाक्यवैशिष्ट must be aided by a thorough knowledge of the situations as they ruled at the two meetings. Then this could as well be given as an instance of. वक्तृवैशिष्ट्यात् व्यञ्जकत्व, the वक्तृवैशिष्ट्य being the knowledge of the नायिका jealous of the उपनायिका. But it could not illustrate बोद्धव्यवैशिष्ट्याद् व्यञ्जकत्व. For the बोद्धव्य वैशिष्ट्य will be प्रच्छन्नकामुकत्व and that is the very व्यङ्ग्य here.

न सा दृष्टिः—The gaze is not as intent and fixed as on the last occasion. कपोलप्रतिबिम्बितां It is hard to see how the gloss on the cheeks of the नायिका should be capable of receiving the image of the उपनायिका. चलितायां तस्यां now that she is away. तदानीं It is the gulf between इदानीं—तदानीं that lends वैशिष्ट्य to the वाक्य and makes it suggestive.

(V)

५ वाच्यवैशिष्ट्य Sometimes the expressed sense itself is suggestive. In वाक्यवैशिष्ट्य the suggestion is due to the वाक्य leaving us curious or साकांक्ष. in वाच्यवैशिष्ट्य, the suggestion is due to the description itself.

St. 17 नर्मदायाः उद्देशः Region. °शोभातिशायी Excelling with the beauty of. कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमः Dissolve कुञ्जोत्कर्षेषु (=उत्कृष्टकुञ्जेषु) अङ्कुरितः (=उत्पन्नः) रमणीनां विभ्रमः गमनविडम्बनादिविलासः यत्र. विभ्रम=शृङ्गारचेष्टा. सुरतसुहृदः वाताः breezes helpful to dalliance. येषामग्रे मनोभूः सरति i. e. which stimulate passion. कलिताकाण्डकोपः Dissolve कलितः (धृतः) अकाण्डे (fitfully) कोपः येन. मदन is described as prone to fitful exitement, in view of the fact that नायिकाs under the sway of love are given to such fitful excitements.

In this stanza is illustrated वाच्यार्थस्य वैशिष्ट्यात् व्यञ्जकत्व. The description itself suggests to the lady to whom the words are addressed (as to other hearers) that the नायक wants his love to enter the arbour for dalliance. The fact that the description refers to सुरतसुहृदः वाताः and रमणीविभ्रम shows how the नायक is keen about सुरत. Hence the suggestion. This व्यञ्जकत्व based on वाच्यार्थ is evidently not possible in the case of लक्ष्यार्थ and व्यङ्ग्यार्थ.

सा. चू. gives this as an instance of वाक्यवैशिष्ट्यात् व्यञ्जकत्व showing thereby how the two वाक्यवैशिष्ट्य and वाच्यवैशिष्ट्य are not *absolutely* distinct. This could illustrate वक्तृवैशिष्ट्य and बोद्धव्यवैशिष्ट्य also but not with as much emphasis as वाच्यवैशिष्ट्य. But it could rightly illustrate देशवैशिष्ट्य.

(VI)

६ अन्यसन्निधि :—Sometimes the speaker, while speaking to another person, has his (or her) eye on a person standing by and therefore makes such remarks as will enlighten the third party rather than the party addressed. In such cases, the presence of the third person is enough to make the वाच्यार्थ or लक्ष्यार्थ व व्यङ्ग्यार्थ suggestive not only to the third party but also to others.

St. 18. *Sanskrit Rendering.*

नोदयत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकलेः।
क्षणमात्रं यदि सन्ध्यायां (केवलं) भवति न वा भवति विश्रामः ॥

अनार्द्रमनाः Hardened in her mind. 2nd half to be construed:—यदि क्षणमात्रं विश्रामः भवति स सन्ध्यायां भवति। वा (अन्यथा) नैव भवति। If there is at all any leisure it is in the evening; otherwise none.

A wanton addresses these words apparently to a second person. But when we recognise that there is a third party standing by and again that the third party is involved in an intrigue (whether as उपपति or go-between) with the speaker, we see that the words are suggestive. The woman suggets that the संकेतकाल should be the evening.

तटस्थं प्रति : The third party is only a listener, not participating in the conversation between the two. संकेतकाल Time for an appointment of love.

Note that this St. could have illustrated वक्तृवैशिष्ट्यात् or बोद्धव्यवैशिष्ट्यात् व्यञ्जकत्व also. वक्तृवैशिष्ट्यात् if we were to know that the woman is wanton; बोद्धव्यवैशिष्ट्यात् if the stanza were addressed to the उपपति.

(VII)

७ प्रस्ताववैशिष्ट्य :--प्रस्ताव is the particular occasion when a remark is made. This also sometimes makes the remark suggestive.

St. 18. *Sanskrit Rendering.*

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण।
एवमेव किमिति तिष्ठसि तस्मात् सखि सज्जय करणीयम् ॥

एवमेव किं तिष्ठसि why stand idle? सज्जय करणीयम् i.e. keep the meal ready. तव प्रियः The husband.

The St. illustrates वाच्यार्थस्य प्रस्तावैशिष्ट्यात् व्यञ्जकत्व.

The remark is made by her friend to a wanton who is on the point of stirring out to keep an appointment with her paramour. The know-

ledge of this occasion or प्रस्ताव makes the words suggestive to the effect: 'It will be improper on your part to stir out at this juncture when your husband's arrival is imminent'.

न युक्तं is the व्यङ्ग्य. उपपति Paramour.

This could not illustrate वक्तृवैशिष्ट्य but बोद्धव्यवैशिष्ट्य could be illustrated therewith.

(VIII)

८ देशवैशिष्ट्य; A particular location sometimes is enough to make words suggestive. That is to say, words uttered in particular environments become suggestive.

St. 20. अवचाय=अवचय. अस्मि particle for अहं. सख्य: Vocative. हे सख्यः अत्र अस्मि (=अहं) अवचायं करोमि. अयं अञ्जलिः वः (=युष्मभ्यं) रचितः I fold my hands in a request to you.

The St. illustrates देशवैशिष्ट्यात् वाच्यार्थस्य व्यञ्जकत्वम्.

The words are addressed by the नायिका to a group of her सखीs of whom one enjoys her confidence. To this सखी the words are suggestive—not to others. The सखी sees that the spot is secluded and she recognises how the नायिका wants to remove all others off the scene with the words यूयं अन्यत्र कुसुमावचायं कुरुध्वम्. She takes up the hint that she is required by the नायिका to send for the lover who is hiding close by. This is the suggestion.

Here suggestion is due to the fact that the spot is secluded. This could be given also as an instance of वक्तृवैशिष्ट्य.

विविक्त secluded. अभिसार्यताम् should be sent forth. आश्वस्ता a friend enjoying the confidence of the speaker.

(IX)

९ कालवैशिष्ट्यः—Particular time also helps to make words suggestive.

St. 21 *Sanskrit Rendering.*

गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी खल्वहम्
अद्य प्रवासं व्रजसि व्रज स्वयमेव जानासि करणीयम् ॥

गुरुजनपरवश Too much under the sway of elders to pay attention to the requestof the नायिका. स्वयमेव जानासि करणीयम् You know what course I am about to pursue i. e. I shall court death when you go on travel.

But acc. to the वृत्ति, स्वयमेव जानासि करणीयं will have to be interpreted as 'you know best what course you should pursue. I cannot dictate that. As for myself I have decided to put an end to my life,

These words are addressed to her husband by a woman when he is on the point of starting on travel. The word अद्य which, we learn from other sources, refers to spring-time makes her words full of suggestion to the effect "I'll put an end to my life. Regarding yourself, it is for you to decide what to do." For spring-time stimulates the passion in lovers making separation unbearable. Thus the particular time when the words are uttered makes the words suggestive. अहं तावत् न भवामि I shall be no more, *i. e.* I shall put an end to my life. तव गतिं न जानामि *i. e.* you are master of yourself The suggestion follows particularly from the words स्वयमेव जानासि करणीयम्.

(X)

१० Other circumstances like चेष्टा:—Sometimes gestures make words suggestive. Words descriptive of particular gestures also become suggestive. आदि includes लीला (Sportive movement) acc. to to प्रदीप.

St. 22. द्वारोपान्तनिरन्तरे मयि when I was (of course concealed) close by the door. सौन्दर्यसारश्रिया तया: She whose glory lay in her superb beauty (सौन्दर्यसार). Line 2: Construe तया ऊरुयुगं प्रोल्लास्य परस्परसमासक्तं समासादितम्—for meaning and suggestion consult उद्योत. शिरोंऽशुकं पुरतः आनीतम् suggests that the lover should come slyly. शिरोंऽशुक the silken garment on the head. चले लोचने अधः क्षिप्ते suggesting, उद्योत says, that the time of sun-set should be संकेतकाल. तत्र Then. वाचः प्रसरणं निवारितं suggesting that the arrival shoul d b: silent. सकोचते दोर्लते suggests an eagerness for embrace.

The stanza describes the gestu es of a woman to her lover who is standing concealed from others. Note that here the suggestions are felt by the concealed lover, and by those who know that the lover is hiding close by. Thus gestures make the वाच्यार्थ suggestive of different things.

चेष्टया Referring to the various gestures. प्रच्छन्नकान्तविषयः आकूतविशेषः The peculiar eagerness of the नायिका with ret. to the lover in concealment.

निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया च पुनः पुनरुदाह्रियते :—मम्मट has allotted a separate instance to each one of the circumstances. We have seen how some of the instances could have been illustrative of circumstances more than one. Where then the point in piling instance over instance ?

मम्मट says that he has done so, firstly, with a view to make an instance illustrative *absolutely* of one circumstance. The student can get a clearer idea if a separate iustance is given to illustrate each circumstance. His understanding of the circumstance becomes absolute and complete when a separate instance is given. And secondly, it was possible for मम्मट to give separate instances because there was ample room, in the 3rd उल्लास, to spare. If a separate उल्लास is allotted to the treatment of आर्थी व्यञ्जना why not take the full advantage, says मम्मट.

वक्रादीनां मिथः संयोगे द्विकादिभेदेन :—मम्मट refers to the possibility of the circumstances combining in twos, threes and so on. Thus, for

instance, वक्तृवैशिष्ट्य and बोद्धव्यवैशिष्ट्य may jointly make the वाच्यार्थ etc. suggestive. द्विकादिभेदः Varieties due to the combination of two (द्विक) or more circumstances. See the instance given by प्रदीप, explained by उद्योत. Some mss. of the का. प्र. incorporate this in the text.

अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम् :--The instances so far advanced relate to वाच्यार्थस्य व्यञ्जकत्व. Similarly there could be instances of लक्ष्यार्थस्य व्यञ्जकत्व and व्यङ्ग्यार्थस्य व्यञ्जकत्व due to all the circumstances—excepting वाच्यार्थस्य वैशिष्ट्य. For instances of लक्ष्यार्थस्य and वाच्यार्थस्य व्यञ्जकत्वे See stt. 7-8 in उल्लास II.

सू. ३८.

Construe:—यतः शब्दप्रमाणवेद्यः अर्थः अर्थान्तरं व्यनक्ति, तत् (=ततः) अर्थस्य व्यञ्जकत्वे शब्दस्य सहकारिता।

We saw how at the close of the 2nd उल्लास, मम्मट reconciled शाब्दी व्यञ्जना with the definition of काव्य as consisting of शब्दार्थौ. Here he reconciles आर्थी व्यञ्जना with the definition.

आर्थीव्यञ्जना is, as we saw, based on वाच्यार्थ, लक्ष्यार्थ or व्यङ्ग्यार्थ. If thus it is based on अर्थ, how could poetry embodying आर्थीव्यञ्जना be defined as शब्दार्थौ?

मम्मट says that even आर्थी व्यञ्जना based as it is on अर्थ has to depend upon the help of शब्द. For if the शब्द were not there, no अर्थ, वाच्यार्थ लक्ष्यार्थ व्यङ्ग्यार्थ could have been there. And in the absence of अर्थ, आर्थी व्यञ्जना would have been impossible. Thus though अर्थ forms the basis of आर्थी व्यञ्जना, the अर्थ stands in need of the help of शब्द which constitutes its vehicle. Thus *both* अर्थ and शब्द are ultimately responsible for आर्थी व्यञ्जना and this is quite in harmony with the definition of काव्य as शब्दार्थौ. It must be admitted however that just as in शाब्दी व्यञ्जना, शब्द is प्रधान, so in आर्थी, अर्थ is प्रधान.

शब्दप्रमाणवेद्यः अर्थः The sense that we get from शब्दs only:—whether वाचक, लाक्षणिक or व्यञ्जक. As the वृत्ति says, अर्थ or idea derived from a प्रमाण other than शब्द is incapable of being व्यञ्जक. This shows the dependence of आर्थी व्यञ्जना on शब्द. अर्थान्तरं व्यनक्ति refers to to the अर्थ suggested from the वाच्यार्थ etc. due वक्तृवैशिष्ट्य etc. अर्थस्य व्यञ्जकत्वे=आर्थ्यां व्यञ्जनायां. शब्दस्य सहकारिता=शब्द is auxiliary—शब्द whether वाचक, लाक्षणिक or व्यञ्जक.

न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः Ideas derived from sources of knowledge other than शब्द do not become suggestive. Ideas derived from शब्द only can lead to a further suggestion. Not so ideas derived from other प्रमाणs, viz. प्रत्यक्ष, अनुमान for उपमान—for these ideas are ends in themselves. An inference, or instince, is an end in itself and cannot lead to any suggestion, nor is it meant to do so.

—:o:—

Index of Topics in उल्लासs I. II. III.

References to pages of text.

——: o :——

अजहत्स्वार्था See उपादानलक्षणा
अगूढव्यङ्ग्यालक्षणा, 56.
अञ्जन–See व्यञ्जना.
अधमकाव्य–See चित्रकाव्य.
अध्यवसान, 49.
अन्विताभिधानवादिन्, 26.
अपोह, 37.
अभिधा, 38.
अभिधामूलव्यञ्जना, 65.
अभिहितान्वयवादिन्, 25.
अर्थ,s वाच्य, लक्ष्य, व्यङ्ग्य, 25.
अर्थचित्र See चित्र.
अर्थापत्ति, 45.
अवरकाव्य See चित्र.
आकांक्षा, 25.
अविनाभाव, 51.
आक्षेप, 44, 52.
आरोप, 49.
आर्थीव्यञ्जना, 75.
उत्तमकाव्य–See ध्वनि.
उपचार, 46, 54.
उपादानलक्षणा, 42.
उपाधिs, 33.
काकु, 75.
काव्यकारण, 8.
काव्यलक्षण, 11.
काव्यप्रयोजन, 6.
गुण, 33.
क्रिया, 33.
गुणीभूतव्यङ्ग्य, 19.
गूढव्यङ्ग्या लक्षणा, 56.
गौणीलक्षणा 3 views, 49.
चित्रकाव्यः शब्दचित्र and अर्थचित्र, 20.
जहत्स्वार्था See लक्षणलक्षणा.
जाति, 33.
तात्पर्य अर्थ, 25.
ध्वनि, 15–16.
नानार्थव्यञ्जनाः See अभिधामूलव्यञ्जना
नान्तरीयकत्व, 51.
नैयायिक view on संकेत, 37.
प्रकटता, 63.
प्रतिभा or शक्ति, 9.
प्रवृत्ति, 37.
प्रयोजनमूला लक्षणा, 40–41.
बौद्ध view on संकेत, 37.
मध्यमकाव्य See गुणीभूतव्यङ्ग्य.
मीमांसा view re. संकेत 36–37; re. गौणी, 50.
मुख्यार्थ, 38.
यदृच्छा, 34.
योग्यता, 25.
रूढिमूलया लक्षणा, 40–41.
लक्षणलक्षणा, 42.
लक्षणा, 39.
लक्षणामूलव्यञ्जना, 60.
लक्ष्यार्थ, 39.
लाक्षणिकशब्द, 24–59.
वाचकशब्द, 24.
वाच्यार्थ See मुख्यार्थ.
वैयाकरणs on ध्वनि 16; on संकेत, 35.
व्यक्ति–उपाधि, 31–32.
व्यङ्ग्यार्थ, 25, 74.
व्यञ्जकशब्द, 24.
शब्दचित्र See चित्र.
शाब्दीव्यञ्जना See अभिधामूला and लक्षणामूलाव्यं.
शुद्धालक्षणा, 46, 48.
श्रुतार्थापत्ति, 45.
संवित्ति, 63.
संकेत (or साक्षात्संकेत), 30.
सन्निधि, 25.
समय See संकेत.
साध्यवसाना, 48.
सारोपा, 47.
स्फोट, 16.

APPENDIX A

रुचककृते सङ्केते प्रथम उल्लासः ॥

ॐ येन वह्निशिखाश्लेषो भालेधूसरसुभ्रुवाम् ।
नासह्यतेर्ष्ययेवाशु स शुभायास्तु वः शिवः ॥
ज्ञात्वा श्रीतिलकात्सर्वालङ्कारोपनिषत्क्रमम् ।
काव्यप्रकाशसंकेतो रुचकेनेह लिख्यते ॥

रसेति ॥ शृंगारहास्यकरुणावीररौद्रभयानकाः । बीभत्साद्भुतशांताश्च नव नाट्यरसाः
स्मृताः ॥ इति काव्यरसाः ॥ रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः । षड् द्रव्यमाश्रिता इति
लौकिका रसाः ॥ **न चेति** । तिक्तादयो हि न हृद्याः ॥ रसाङ्गभूतव्यापारेति । उक्तं हि **हृदयदर्पणे** ॥
शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग् विदुः । अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः । द्वयोर्गु-
णत्वे व्यापारप्राधान्ये काव्यधीर्भवेदिति ॥ **लोकोत्तरेति** । तथा चोक्तं **काव्यकौतुके** । प्रज्ञा नवन-
वोल्लेखशालिनी प्रतिभा मता । तदनुप्राणनाज्जीवद्वर्णनानिपुणः कविः ॥ तस्य कर्म स्मृतमिति ॥
न तु काव्यस्यादिसिद्धत्वं । **लोकस्येति** । लोकशब्दमात्र(स्य) लोकवृत्ते वर्तनं (=वृत्त्या ख्यापनं?)
वर्णनीयस्यानन्त्यख्यापनार्थं । अन्यथा स्थावरजंगमात्मनो लोकस्यादिकविनैव वर्णितत्वात्
काव्यपरिसमाप्तिरेव स्यात् । अत एव **वामनो** लोकवृत्तं लोक इत्युक्तवान् ॥ **तददोषौ शब्दार्थौ-**
विति ॥ अनेन उल्लासदशकस्य संक्षेपेण सूत्रणं कृतम् । तथा च **तदिति** सप्रयोजनं सहेतुकं च
सप्रभेदं च काव्यस्वरूपं प्रथमोल्लासे निर्दिष्टं सूत्रितम् । **शब्दार्थाविति** धर्मिभूतयोः शब्दार्थयोः
द्वितीयतृतीयोल्लासनिर्णितयोः सूत्रणाम् । अनन्तरं **तदिति** अनेनैव सप्रभेदं यत्काव्यस्वरूपमुद्दिष्टं
तस्य त्रयो भेदाः सप्रपञ्चमुल्लासत्रयेण प्रतिपादिताः ॥ **अदोषावित्यनेन** दोषाणां परिहार्यत्वेन सूत्रि-
तानां सप्तमोल्लासे निर्णयः । **सगुणावित्यनेन** सूत्रितानां गुणानामष्टमे प्रपंचितम् । **अनलंकृती**
क्वापीती । विशेषप्रतिषेधे शेषाभ्यनुज्ञानमितिन्यायेनोट्टंकितानां द्वयेषां शब्दार्था-
लंकाराणां क्रमेण नवमदशमयोरुल्लासयोर्निर्णयः । एवंपदपंचकेनोल्लासदशकाः सूत्रि-
ताः । **यः कौमारेति** । अत्र तत्रस्थितानां ग्रैष्मिकधूलिकदम्बानां वसन्ते
उद्भिन्नाङ्कुराणां येऽनिलास्ते वासन्तिकमालतीपरिमलोल्लासिन इति व्याख्येयम् ।
एवं च निकुरुम्बीभूता सामग्री रसोद्दीपनहेतुर्वर्णिता । ये तु ऋतुभेदमित्थं वर्णयन्ति
यथाः—चैत्रक्षपा इति निर्देशः वसन्तस्य, मालतीत्यादिना च निदाघप्रावृषोर्निर्देश इति ।
न तै रसोद्दीपनहेतुर्मीलिता सामग्री व्याख्याता स्यात् । अत्र पक्षे कदम्बानिलानां कथं मालतीपरि-
मलोल्लासकत्वं भिन्नर्तुभवत्वात् । नापि कदम्बरूपाः समूहरूपा अनिला इति शोभनव्याख्या ।
तस्मादस्मद्व्याख्यानमेव साधु ॥ **अत्र स्फुट** इति । अत्र बहूनां वाक्यार्थानां तुल्यत्वेन निर्देशा-
त्तुल्ययोगिता । औपम्यस्य चाप्रतीतेरस्फुटतेति केचित् । तदसत् । कस्यचित् गुणस्य वा क्रियाया वा
साधारण्येनाप्रतीतेस्तुल्ययोगितालक्षणस्यैवाभावात् । औपम्यं च तुल्ययोगितायाः प्राणभूतं, औप-

म्यस्य त्वभावे सैव नास्तीति कस्यास्फुटत्वम् । एतेन दीपकमपि प्रत्युक्तम् । समुच्चयस्तु वैचित्र्याति-शयाभावान्न महद्भिरुद्भटप्रभृतिभिरंगीकृत इति न चिन्त्यते । **कौमारहरेति** चित्रमस्फुटमलंकरणं यैर्व्याख्यातं तदपि न साधु तस्य मुख्यालंकरणत्वाभावात् । न तच्चमत्कारकारि । आश्चर्यमात्रं करोतीति नैतावता मुख्यालंकारत्वम् । तथा **चोद्भटप्रभृतिभिर्न** तत्स्वीकृतम् । यत्पुनरिह चित्रमन्य-द्वालंकरणत्वेन वक्ष्यते तदस्य ग्रंथस्य व्यापकत्वप्रतिपादनार्थं, तस्मादेतदपि न व्याख्येयं तस्मादि-त्थमेतत् । इह यः कौमारहर इत्यादीन्यनुत्कण्ठाकारणानि तेषु सत्स्वपि सा नोत्पन्ना तद्विरुद्धाया स्तूत्कंठाया उत्पादात् । अतश्च विशेषोक्तिरियम्, साच कार्यस्य साक्षान्निषेध्यमानत्वेनाप्रतीतिरस्फुटा । विरुद्धोपलब्धिद्वारेण ह्यत्र कार्यनिषेधः प्रतीयते । न साक्षादित्यस्फुटविशेषोक्तिः । यद्वा उत्पन्नाया उत्कण्ठायाः कारणानि न विद्यन्ते तानि हि कौमारहरवरादीनामसन्निधानादीनि । तद्विरुद्धानां च सन्निधानादीनामत्र भावात्तदभावः।तेनेयं विभावना । साच स्फुटकारणस्य कौमारहरवराद्यसन्निधान-लक्षणस्य साक्षान्निषेध्यत्वेनाप्रतीतेरस्फुटा । वरचैत्रक्षपादिसंनिधानद्वारेणैव अत्र कारणनिषेधो ज्ञेयो भवति न साक्षादित्यस्फुटविभावना ॥ **निःशेषेत्यादि** ॥ च्युतं न तु क्षालितम् । निर्मृष्टो न तु किंचिन्मृष्टः। दूरमनञ्जने निकटे तु साञ्जने । पुलकिता तन्वीत्युभयं व्यंग्यापेक्षम् अधमपदं तु व्यञ्जकम् । एतच्चो-दाहरणं वैदग्ध्येन युगपन्निषेधे विधौ च वाच्ये विधिनिषेधयोः व्यंग्ययोर्दत्तम् । **ध्वनिकृता** हि विधौ वाच्ये निषेधः पृथक्, निषेधे वाच्ये विधिः पृथगुदाहृतः । विधिनिषेधद्वारेण चोदाहरणं वाच्य-व्यंग्ययोरत्यंतवैलक्षण्याख्यापनार्थं ॥ **चित्रमिति** ॥ गुणालंकाराश्च शब्दार्थधर्माः । यद्योगाद्रस-प्रतीत्या तात्पर्येण चित्रमालेख्यप्रख्यम् तेनाश्चर्यकारिगुणाश्च यद्यपि रसधर्मा वक्ष्यन्ते तथाप्युपचारात् शब्दार्थधर्मा उक्ताः । तथा च वक्ष्यतिः–गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मतेति ॥ **स्वच्छंदे-त्यादि** ॥ छातं तनु । अह्नाय झगित्येव । दर्दुराः मण्डूकाः । ये तु दर्दुरं गिरिविशेषं व्याचक्षते तैः कविभिर्दिक्विशेषानभिज्ञत्वं प्रकाशितं स्यात् । यतः पूर्वसमुद्रगामिन्या मन्दाकिन्या दक्षिणापथस्थितेन दर्दुरगिरिणा संबंधो नास्ति । तथाच **कालिदासः**–स निर्विश्य यथाकामं तटस्वाधीनचन्दनौ । स्तना-विव दिशस्तस्याः शैलौ मलयदर्दुराविति ॥ **विनिर्गतेत्यत्र** ॥ अमरावती भवतीति समन्वयः ॥ **इति काव्यप्रकाशसंकेते प्रथमोल्लासः** ॥

द्वितीय उल्लासः ॥

आकांक्षेति तथा चोक्तमन्यत्र । आकांक्षा संनिधानं च योग्यता चेति तत्त्रयम् । संबंधकार-णत्वेन क्लृप्तं नानन्तरश्रुतिः ॥ तथाच–यस्य येनाभिसंबंधो दूरस्थस्यापि तेन सः । अर्थतो ह्यसमा-द(व?)क्षि जरद्गवमित्यादि ॥ मातर्गृहोपकरणमद्य खलु नास्तीति कथितं त्वया । तद्भण किंकरणी-नानामानंतर्यमकारणम् ॥ अपि पश्यसि धावन्तं दूरे जातं वनस्पतिम् । त्वां ब्रवीमि विशालाक्षि नापि यमेवमेव न वासरस्तिष्ठति ॥ साधयन्ती कथयन्तीवा सखि सुभगं क्षणेक्षणे दूनासि ममकृते । सद्भाव-स्नेहकरणीयसदृशं तावद्विरचितं त्वया ॥ अत्र वाच्यस्यापकारिणो वक्तुश्चापकारवत्पर्यालोचनाद्बा-धितमुख्यार्थः शब्दो विपरीतलक्षणया कौटिल्यनिःस्नेहत्वादीनाक्षिपति । स च लक्षितोर्थोर्थान्तरं प्रकाशयतीति वाच्यस्य व्यञ्जकत्वम् । ननु वाच्यादित्यादि (उ.५) पर्यालोचनेन मुख्यार्थबाधे सति मूर्धाभिषिक्तेषु **भमधम्मीत्यादिषु** (उल्लास ५) ध्वन्युदाहरणेषु मुख्यार्थबाधाद्विपरीतलक्षणाप्रवेश-

प्रसंगः । नैतत् । इह यत्र वाच्योर्थः कयाचिद्गमनिकया समर्थयितुं शक्योर्थान्तरमेवागूरयति यद्वागूरितो विरोधान्मुख्यमर्थं युक्तिमत्तयावगमयाति तत्तस्यासत्यत्वं क्वोपयुज्यते । तस्य हि युक्तिवशात्प्ररूढप्रतीतेर्बाधः प्रतीतिश्चाभिधात एवेति कुतो मुख्यार्थबाधः कुतो वा लक्षणा । यत्र हि वाच्यस्य कयापि गमनिकया समर्थयितुमशक्यस्य वक्त्रादिवशात् बाध्यतया प्रतीतिः तत्र मुख्यार्थबाधाल्लक्षणा । **भमधम्मि** इत्यादौ च वाच्यस्य समर्थयितुं शक्यत्वान्मुख्यार्थबाधाभावान्न विपरीतलक्षणायोगः ॥ **साहेन्तीत्यादौ** च वाच्यस्य समर्थयितुमशक्यत्वाद्वक्त्रादिवशात् बुभूषन्नेवान्वयो बाधित इत्यस्ति मुख्यार्थबाधः । संबंधश्चात्र विरोधाभिधं वैपरीत्यमेवेति न किंचिदसंगतम् ॥ तथाचोक्तं ॥ क्वचिद्बाध्यतया ख्यातिः क्वचित् ख्यातस्य बाधनम् । पूर्वत्र लक्षणा तस्मात् उत्तरत्राभिधैव तु ॥ **उअ** ॥ पश्य निश्चलनिस्पंदा बिसिनीपत्रे शोभते बलाका । निर्मलमरकतभाजनप्रतिष्ठिता शंखशुक्तिरिव । **संकेतितमिति** ॥ चतुष्टयी शब्दानां प्रवृत्तिः । तात्पर्योक्तेपि केषुचिदित्यादिप्रक्रियाश्रयेणावास्तवशब्दार्थाभिप्रायेणायोग्यं संकेतितमिति वचनव्यक्तिरपरभाषाप्राया । **व्यभिचाराच्चेति** । यत्र व्यक्तौ संकेतः सा व्यवहारकाले व्यभिचरति ॥ **पारिभाषिकमिति** । अन्यथा जातिशब्दत्वं स्यात् । न खलु स्वयं परमाणुर्नाप्यपरमाणुः परमाणुत्वसंबंधात्तु परमाणुरिति ॥ **गौरनुबंध्य इति** ॥ अत्र जातिलक्षणे विशेषणे क्षीणशक्तित्वात् न व्यक्तिरभिधेया किंत्वाक्षेपलक्षणेन सा शक्येन जातेरनुबन्धनसिद्ध्यर्थं प्रतीयत इत्युपादानलक्षणा **भट्टमुकुलकेन** व्याख्याता न युक्ता । अविनाभावित्वलक्षणेनाक्षेपेण तस्याः प्रतीतेः । प्रविश पिण्डीमित्यादिवत् । न तु लक्षणैषा । द्विप्रकारकत्वादत्र तदसंभवात् । द्विविधो ह्याक्षेपो लक्षणामूलोऽविनाभावित्वमूलश्च । अत्र चोत्तर एव पक्ष इति न लक्षणासंभावना कार्येत्यर्थः । **श्रुतार्थापत्तेरिति** । दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थपरिकल्पनमर्थापत्तिरित्येतत् **भाट्टाः** विवृण्वते ॥ **दृष्ट** इति प्रत्यक्षानुमानोपमानार्थापत्त्यभावलक्षणैः पञ्चभिः प्रमाणैः उपलब्धः । प्राधान्यख्यापनार्थं शब्दस्य भेदेन निर्देशः । इति श्रुत इति शब्दलक्षणेन प्रमाणेन ज्ञातोऽर्थो वस्तुविशेषः । अन्यथा नोपपद्यते अर्थापत्तिः । व्यवस्थाप्यमर्थमन्तरेण न युज्यत इति इत्यर्थस्य कल्पना सार्थापत्तिः । तत्र प्रत्यक्षपूर्विका यथा मन्त्रस्तब्धोऽग्निर्न दहतीति । न स्वरूपमात्रेण (अ ?) दाहक इति विस्फुटं दाहकार्यम् । प्रत्यक्षेणोपलब्धाग्नेः या दाहिका शक्तिः कल्प्यते सा प्रत्यक्षपूर्विकार्थापत्तिः । न चेद मनुमानं शक्तेरप्यनुपलभ्यत्वादन्वयव्यतिरेकग्रहणासंभवात् कार्यहेतुत्वायोगात् । देशान्तरप्राप्त्या आदित्यस्य गतिक्रियामनुमाय गमनशक्तिः कल्प्यत इत्यनुमानपूर्विका सा । एवमन्या अपि ज्ञेयाः । **प्राभाकरास्तु** दृष्ट श्रुत इति लोकप्रसिद्ध्या उपलब्धिमात्रे वर्तत इति व्याचक्षते । तेन श्रुतार्थापत्तौ रात्रौ भुंक्ते इति शब्दः परिकल्प्यते । अर्थापत्तौ तु रात्रिभोजनमर्थ एव । **अनयोरिति** गंगाशुद्धभेदयोः । **तटस्थत्वमिति** । अनेन तटस्थे लक्षणा शुद्धेति **भट्टमुकुलक**मतं दूषितम् । गता हि पावनत्वादयस्तटे प्रतिपिपादयिषितास्ते च तटस्य गंगारूपप्रतीतौ प्रतीयन्ते न भेदस्वभावे ताटस्थ्ये इति तटस्थत्वप्रतिपादनमयुक्तम् ॥ **अग्रहस्त इति** । इह हस्ताग्रमग्रहस्त इति प्रयोगद्वयं दृश्यते । तत्राद्ये षष्ठीसमासः द्वितीये तु समानाधिकरणो विशेषणसमासः । तत्र च हस्तावयवेऽग्रमात्रे हस्तशब्दो ग्रामो दग्ध इत्यादिवदवयवे समुदायोपचारत्वाद्वर्तते । तदुक्तं **वामनेन**–हस्ताग्राग्रहस्तशब्दौ गुणगुणिनोर्भेदाभेदाभ्याम् । इत्ययमर्थः । प्रयोजनस्य गूढागूढत्वप्रतिपादकं ध्वनिर्गुणीभूतव्यंग्यं (च) वक्ष्यते ॥ **विकसितस्मितमिति** । अत्र विकसितत्वेन प्रसृतत्वं वशितत्वेनायत्तत्वमेवं समुच्छलितत्वादिना उल्लसितत्वादि लक्ष्यते । प्रयोजनं तेषामेवासंविज्ञानपदनिबंधनं लोकोत्तरं सातिशयत्वम् । तथाहि

धर्मधर्मिभेदाद्विविधं लक्ष्यम् । तत्र धर्मी यत्र लक्ष्यते तत्र धर्मः प्रयोजनं यथा गंगाशब्देन तटे लक्ष्ये पावनत्वादयः, यत्र तु धर्मा एव लक्ष्या न तत्र धर्मान्तराणि प्रयोजनं धर्माणां धर्मान्तराभावात् अपि तु तत्र तेषामेव सातिशयत्वं प्रयोजनं एवमिहापि बोद्धव्यम् ॥ उपदिशतीत्यत्र प्राधान्येन शिक्षादानमभिधेयवत् स्फुटं प्रतीयते । **अत्रेति** तत्र शब्दार्थे वृत्तः फले संबध्यते । **लक्ष्यं न मुख्य-मिति** । इदं प्रयोजनस्य लक्षणीयत्वसंभावनायामुक्तम् । तत्र मुख्यार्थबाधे संबंधे प्रयोजने च सति लक्षणा प्रवर्तते । न च प्रयोजने लक्षयितव्ये त्रयमेतत्संभवति । तथा हि तटस्य लक्ष्यस्य बाधे प्रयोजनं लक्ष्यं स्यात् न च तदभिप्रायेण मुख्यार्थबाधो घटते । नहि तटादिः मुख्यार्थो लक्षणीयत्वात् । नापि तस्य तटस्य बाधस्तस्य घोषाधिकरणोपपत्तेः । अपि च संबंधनिमित्ता लक्षणा प्रयोजने प्रवर्तितुं नार्हति । तटादेर्लक्ष्यस्य पावनत्वादेश्च प्रयोजनस्य संबंधाभावात् । नहि गंगागतपावनत्वादिभिः तटे कश्चित् संबंधः । अतएव तटस्थे लक्षणा शुद्धेति प्राक् दूषितम् । किं च प्रयोजने लक्षणीये लक्ष्यत्वादेव प्रयोजनं मार्गणीयम् । न च तदस्ति नापि युज्यते वक्ष्यमाणरीत्या अनवस्थाप्रसंगात् । एवं तावत् त्रितयाभावात् प्रयोजने लक्षणा न युज्यते । अपि च लक्षणीयेऽर्थे शब्दस्य स्खलद्गतित्वं प्रतिपादयितुं शक्तता भवति । अतश्च शक्तता षड्लक्षणस्य प्रयोजनसाकांक्षत्वम् । न च प्रयोजनं प्रतिपादयितुं शब्दो न शक्तो निराकांक्षत्वेन तत्रैव विश्रांतेः । मुख्यार्थबाधस्तु स्खलद्गतित्वं न शंकनीयम् । वाच्याभिप्रायेण हि मुख्यार्थबाधो लक्ष्याभिप्रायेण तु स्खलद्गतित्वमिति महाननयोर्भेदः । तस्मात्प्रयोजने लक्षणावृत्तिसंभवे व्यंजनमेव शब्दव्यापार इति स्थितम् । **प्रयोजनेन सहितमिति** ॥ कश्चिद्ब्रूयात् । गंगायां घोष इत्यादौ पावनत्वादिप्रयोजनविशिष्टमेव तटादि लक्षयिष्यते । तस्यैव प्रत्येयत्वात् । एवं च नास्ति व्यंजनव्यापारस्य विषय इति ॥ तत्रोच्यते । लक्षणायाः प्रयोजनं प्रस्तुतं, लक्षणा च शब्दव्यापारः, व्यापारश्च विषयनिष्ठ एव तन्मुखेन स्वरूपप्रतिलंभात्, विषयस्यात्र प्रत्येयत्वात् प्रतीतिगोचरत्वेन न संपाद्यत्वेन ॥ एवं च लक्षणायाः प्रयोजनमिति भणितौ यादृशी लक्षणा तादृश्याः प्रयोजनं वाच्यम् । प्रत्येयविषयनिष्ठशब्दव्यापाररूपा हि लक्षणा । तस्या गर्भीकृतविषयायाः प्रयोजने विचार्ये कोऽवसरः प्रयोजनस्य लक्षणाविषयतायाः । गर्भीकृतत्वभंग्या हि विषयस्य प्रयोजनं न तु प्रयोजनं विषयः । तत्तु प्रत्येयतया विषयत्वेन विचार्यमाणं तदतिरिक्तव्यापारान्तरस्य विषयो भवितुमर्हति औत्तरकालिकत्वात् । तच्च व्यापारान्तरं व्यञ्जनमेव एतादृशी चोपपत्तिर्ग्रन्थकृता दृष्टान्तमुखेन प्रकाशिता । एवं च यः कश्चित् गर्जति यद्यत्प्रयोजनं तत् तत् साध्यं, यथा पाकादिफलभूतमोदनादि । लक्षणाप्रयोजनं च पावनत्वादि । तस्यार्थाल्लक्षणासाध्यत्वप्रतीतिरित्यादि ॥ तत् तत्साध्यत्वसाधनेन सिद्धसाधनत्वात् प्रत्येयत्वेन च विषयत्वस्यासमर्थनान्निःसारमेवेति नेह विस्तारितम् । यत्तु ओदनादेः पाकविषयत्वमुच्यते तदुद्देश्यत्वान्न प्रतीतिगोचरत्वात् । प्रतीतिगोचरत्वं चेतः प्रस्तुत मित्यलं दुःसमर्थ(र्थ्य)समर्थनेन ॥ अन्ये तु पावनत्वादिविशिष्टे लक्षणामित्थं दूषयन्ति । अनन्वयप्रभवा अन्वयपर्यवसायिनी च लक्षणा न्याय्या । अन्यथा तदाश्रयणस्य निर्हेतुकत्वं स्यात् । एवं मुख्यार्थबाधापर्यवसायिनानन्वयेन समुत्थापिता लक्षणा येन विरूढान्वयघटनं स्यात् तदेव विषयीकरोति नातिरिक्तं किंचित् । कठिनद्रव्यं च तटादिकं विना गंगायां घोष इत्यादौ नास्त्यन्वयः न तु पावनत्वादिभिर्विना इति तदेव लक्षणीयं, न तु पावनत्वादि प्रयोजनमिति तत्र व्यञ्जनमेव साधु । अर्थः प्रयोजनं भवच्छेदस्य प्रयोजनत्वात् । लिंगं चिह्नं कामस्य मकरचिह्नत्वात् ॥ **मधुना मत्त** इति कोकिलमदने वसन्तस्यैव सामर्थ्यात् ॥ **मित्रमिति** ॥ व्यक्तिः प्रातिपदिकार्थव्यंजकं पुंस्त्वादि । लुपियुक्तवद्व्यक्तिवचने (पा.१-२-५१)

इतिवत् । **न विशेषप्रतीतिहेतुरिति** । यद्यपि चोदात्तादिः काव्ये न विशेषप्रतीतिनिमित्तं तथापि काकुवादि विशेषप्रतीतिहेतुर्भवति । यथा 'मथ्नामि कौरवशतं समरे न कोपादिति' 'स्वस्था भवन्ति मयि जीवति धार्तराष्ट्रा' इति च । ग्रंथकृता त्वेवमपरामृष्टोदात्तादिनिषेधः कृतः । **भद्रेति** । भद्रः कल्याणप्रकृतिः, भद्रा हस्तिनां विशिष्टा जातिश्च । वंशः पृष्ठनाडिश्च । शिलीमुखा याचका भ्रमराश्च । परान्धारयतीति परवारणः, परः प्रकृष्टो वारणो हस्ती च । दानं त्यागो मदश्च ॥ **काव्यप्रकाशसंकेते द्वितीयोल्लासः ॥**

तृतीय उल्लासः ॥

अतिपृथुलं जलकुंभं गृहीत्वा सभागतास्मि सखि त्वरितम् । श्रमस्वेदससिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् ॥ औन्निद्र्यं दौर्बल्यं चिन्ताअलसत्वं सनिःश्वसितं । मम मंदभागिन्याः कृते सखि-त्वामप्यहह परिभवति ॥ तु इति द्वितीयार्थे । अपि प्रश्नमात्रे । भजतीति । त्वामेवं पृच्छामि किं मयि कोपं भजतीत्यादि प्रश्नमात्रम् । तदा मम गंडस्थलनिमग्नां दृष्टिं नानैषीरन्यत्रेदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः । णिमिअं निक्षिप्ताम् । ननु च वाक्यस्य कथमेवोदाहरणम् । अन्यत्रापि वाक्यस्यैव सामर्थ्यात् । आकांक्षायोग्यतासंनिधानवशात्परस्परसमनुव्याहारो वाक्यमिति चेत् सोपि सर्वत्र विद्यत इति कोत्र विशेषः । उच्यते । वाक्यस्थमन्वितं प्रद्योतकं तत् चात्र वाक्यमुच्यते । यथा अत्रैव तइआ एण्हिं इति ॥ एवं च न सर्वत्रातिप्रसंगः । नुदति अनार्द्र-मनाः श्वश्रूर्मां गृहभरे सकले । क्षणमात्रं यदि संध्यायां केवलं भवति न वा भवति विश्रामः ॥ यद्यपि संध्यायामवश्यं भवत्येवेति विवक्षितं तथापि तदुच्यमानं परस्य रक्षणीयं भवति इति तथा नोक्तम् । अत्र चान्यस्तटस्थः परः पुरुषः श्रूयते । समागमिष्यति तव प्रियोद्य प्रहरमात्रेण । एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयं ॥ सज्जं कुरु । गुरुजनपरवशप्रिय किं भणामि त्वां मंदभागिनी अहम् । अद्य प्रवासं व्रजसि व्रज स्वयमेव जानामि(सि?) करणीयम्। **मिथः संयोग** इति। तत्र वाक्यबोद्धव्ययोगे यथा । अत्ता इति ॥ श्वश्रूरत्र शेते अत्राहं दिवसकं विलोकय । मा पथिक रात्र्यंध शय्यायामावयोः शयिष्ठाः ॥ अहमिति निपातः आवयोरित्यत्रार्थे । ममेति तु व्याख्यायमाने व्यंगस्याभिधेयत्वमेव स्यात् । अत्र वाक्यबोद्धव्यपर्यालोचनया शेष्व इति विधिरूपव्यंग्यार्थप्रतीतिः । एवमन्येपि द्विकभेदास्त्रिकादिभेदाश्च स्वयमभ्यूह्याः ॥ तदेवं द्वितीयोल्लासे प्रयोजनस्य व्यंग्यत्वसमर्थनेनाविवक्षित-वाच्याख्ये द्विप्रभेदे ध्वनौ शब्दस्यादौ व्यंजकत्वं प्रतिपादितम् । तदनु विवक्षितान्यपरवाच्याख्यस्य ध्वनिभेदस्य संलक्ष्यक्रमव्यंग्ये प्रभेदे शब्दशक्तिमूलावलंबनेन शब्दस्य व्यंजकत्वमुक्तम् । ततस्तृतीयोल्लासे संलक्ष्यक्रमव्यंग्य एव भेदे अर्थशक्तिमूलावलंबनेन अर्थस्य व्यंजकत्वं प्रकाशितम् । इयतैव व्यंजकत्वनिर्णयो ग्रंथकृता कृतः । केवलं विवक्षितान्यपरवाच्यस्यासंलक्ष्यक्रमव्यंग्ये प्रभेदेर्थस्य विभावादिरूपस्य व्यंजकत्वस्यानुक्तत्वादव्याप्तिर्व्यंजकत्वनिर्णयस्येति चिन्त्यमेतत् । यदि परं, व्यक्तिरेव सेत्यनन्तरं चित्तवृत्तिविशेषस्य रसादेः प्रतिपत्तये विभावादिसमुत्थाप्या व्यक्तिरर्थ-समाश्रयेति कारिका पठनीया । **इति काव्यप्रकाशसंकेते तृतीय उल्लासः ॥**

APPENDIX B

बालचित्तानुरञ्जनी of नरहरि सरस्वतीतीर्थ

प्रथम उल्लासः ॥

श्रीगणेशायनमः । ढुंढिराजमभिनौमि सिद्धिदं विघ्नराजमभिसुंदराधरं । यस्य संस्मरणलेशतोखिलो..............दूरतः ॥ १ ॥ हंसगा सितदुकूलभूषणा त्रीक्षणा कुचनता चतुर्भुजा । देववंद्यचरणाशुचिस्मिता भारती वसतु वाचि मे सदा ॥ २ ॥ जयंति गिरिजापतेश्चरणरेणवो येन्वहं वहंत्याखिल (निर्वृति ?) व्रतति संततेर्बीजतां । धृता हरिसुरेश्वरप्रभृतिभिः स्वमौलिस्थले सतां कनकवत्तथा विमलयंति ये मानसं ॥ ३ ॥ अपि पंचबाणभिन्नं गौरीमुखसाम्यलेशलोभेन । मौलौ सदा मृगांकं कलयन् कल्याणकेलयेस्तु शिवः ॥ ४ ॥ विधातुकामः सुकृतं गरीयः क्षमातलं स्वर्ग इवावतीर्णः । आलंबनं सर्वविशेषणानां जयत्यखंडस्थितिरांध्रदेशः ॥ ५ ॥ स्थलमिव सुकृतानां लोकधात्र्याः समग्रं । विगलितमिव भूमौ नाकलोकस्य खंडं । नगरमतिगरीयः सर्वसंसारसारस्त्रिभुवनगिरिनाम्ना तत्र विख्यातमास्ते ॥ ६ ॥ तत्राभवत्सकलशास्त्रदिवार (विचार ?) पात्रं । श्रीवत्सगोत्रसुरकाननपारिजातः । अन्यद्विधातुवरलंबनमाप्तवाचा (चो ?) । **रामेश्वरः** कलिकलंककथांतरीयः ॥ ७ ॥ आसीत्प्रमाणपदवाक्यविचारशीलः । साहित्यसूक्तिबिसिनीकलजाग्रहंसः ॥ ब्रह्मामृतग्रहणनाटितलोभ (वृत्ति) स्तस्यात्मजो निपुणधीर्न**रसिंहभट्टः** ॥८॥ तस्माद चिंत्यमहिमा महनीयकीर्तिः । **श्रीमल्लिनाथ**इति मान्यगुणो (शास्त्रमतिः) बभूव । यः सौमयागविधिना कलिखंडनाभिरद्वैतसिद्धमिव सत्ययुगं चकार ॥ ९ ॥ लक्ष्मीरिव मुरारातेः पुरारातेरिवांबिका । तस्य धर्मवरांग्यासी**न्नागमेति** गुणाद्व(ब्धि?)जा ॥ १० ॥ ज्येष्ठस्तदीयतनयो विनयोदित**श्रीर्नारायणो** भवदशेषनरेंद्रमान्यः । वाग्देवताकमलयोरपि यस्य गात्रे (गोत्रे) सीमाविभागकलहो न कदापि शांतः ॥ ११ ॥ विरिंचेयार्यायो(राचार्यो?)भुवि सद्वतारः फणिपतेः । त्रिदोषो दोषाणां सकलगुणमाणिक्यजलधिः । अवाचां प्राचां वा सकलविदुषां मौलिकुसुमं । कनीयांस्तत्सूनुर्जयति नयशाली **नरहरिः** ॥ १२ ॥ सवसुग्रहहस्तेन ब्रह्मणा समलंकृते । काले नरहरेर्जन्म कस्य नासीन्मनोरमं ॥ १३ ॥ तत्काले सह मंगलेन गुरुणा मित्रेण लेभे वणिग् । राशिस्तु प्रमदाश्रयेण समभूदुच्चैः स काव्यो बुधः । सत्केतुः शुभहेतवे द्विजपतिर्जातः कुलीरागतो । मैत्रशांतिमयं दधार कलशं जन्मोत्सवाडंबरे ॥ १४ ॥ विचार्य सर्वं सुखमेव दुःखं सुधामये ब्रह्मणि लोलुपस्य । संत(न्य?)स्यतस्तस्य बभूव सार्था **सरस्वतीतीर्थ** इति प्रसिद्धिः ॥ १५ ॥ तर्के कर्कशकेलिना बलवताऽहीनेन विद्यारसै । मीमांसागुणमांसलेन परितः सांख्येप्यसांख्योक्तिना । साहित्यामृतसागरेण **फणिनो** व्याख्यासु विख्यावता । काश्यां तेन महाशयेन किमपि ब्रह्मामृतं पीयते ॥ १६ ॥ काश्यां सरस्वतीतीर्थमतिना तेन रच्यते । टीका **काव्यप्रकाशस्य बालचित्तानुरंजिनी** ॥ १७ ॥ ननु **नियतीत्यादि**रादिमश्लोकोऽनुपपन्नः प्रारिप्सितकाव्यमीमांसाशास्त्रेऽनुपयुक्तत्वादित्याशंक्य प्रारिप्सितग्रंथपरिसमाप्तिपरिपंथिविघ्ननिरासहेतुनमस्कारलक्षणमंगलांचरणप्रतिपादकत्वादुपपन्न एवेत्याह **ग्रंथारंभ** इति । समुचिता एतच्छास्त्रप्रतिपाद्या इष्टा या देवता भारती तां काव्यमी-

मांसाकृतसर्वोत्कर्षेण स्तौति । नियम्यते कमलसौगंध्यादिकं अनयेति असाधारणो धर्मः कमलत्वादि-[र्यती]र्नियतिः तया कृतो यो नियमः तद्रहितां तां । मुखादिकमलत्वादिना ताद्रूप्यनियमात् । अथवा अयं दरिद्रोयमीश्वरो इति नियम्यतेऽनेनेति नियतिर्विधिः । एकं प्राचुर्येण प्रस्तुतमस्यां सा एकमयी ह्लादैनैकमयी ह्लादैकमयी अन्यथा एकश्चासौ ह्लादश्चेति समासे पूर्वं कालेत्यादिना एक-शब्दस्य पूर्वनिपातः स्यात् । कवेः सकाशादन्यस्य कारणस्य परतंत्रा अधीना न भवति कविपरतंत्रैव । न चान्यपरशब्दयोः पौनरुक्त्यं परतंत्रस्याधीनमात्रवचनत्वेन त्वत्परतन्त्रोऽपरतंत्र इति प्रयोगदर्शनात् । नवरसाः शृंगारादयो यस्यां सा । सा रुचिरा मनोहरा च तां । नव च ते रसाः तै रुचिरेति न भवति । षड्सेति न च हृद्यैवेति पृथग्विशेषणविधानविरोधात् । दिक्संख्ये संज्ञायामिति संज्ञायामेव समासविधानात्व(त्?) । समाहारे तु नवरसीरुचिरेति स्यात् । एवंविधां निर्मितिं निर्माणं कुर्वती । न चात्र निर्मितिकरणयोः पौनरुक्त्यं नियतीत्यादि विशिष्टनिर्मितेः करणस्य च सामान्यविशेषभावेन विवक्षितत्वात् । कवेः काव्यकृतो भारती जयति । सा चोत्कर्षेण वर्धते धातूनामनेकार्थत्वात् । अनेन च श्लोकेनैतद्ग्रंथप्रतिपाद्यवस्त्वलंकाररसरूपं ध्वनित्रयं प्रदर्शितं भवति । तथा हि । भवत्यर्थे नमस्काररूपं वस्तु ध्वन्यते । तथा । केनचिद्यत्र धर्मेण द्वयोः संसिद्ध-साम्ययोः । भवत्येकतराधिक्यं व्यतिरेकः स उच्यते ॥ इति ब्रह्मनिर्मितेः सकाशाद्वाङ्निर्मितेरा-धिक्याद्व्यतिरेकालंकारो ध्वन्यते । तथा । रतिर्देवादिविषया भाव इत्यभिधीयते । इति भारतीं प्रति कवे रतिलक्षणो भावो ध्वन्यत इति ध्वनित्रयं अस्याः सर्वोत्कृष्टत्वं प्रतिपादयितुम् । एतत्प्रतियोगि-भूताया ब्रह्मसृष्टेः स्वरूपं निर्दिशति **नियतीत्यादि** । कमलत्वादिसामर्थ्येन नियतानि अव्यभिचा-रीणि रूपाणि यस्यां सा । अनेन प्रथमविशेषणाद्वैलक्षण्यं । सत्त्वरजस्तमोमयत्वेन सुखादिस्वभावा अनेन द्वितीयविशेषणात् । परमाण्वादिसमवायिकारणं च अदृष्टदिकालादि निमित्तकारणं च तद-धीना । अनेन तृतीयविशेषणात् । मधुरादिषड्रसाः तैः रसैः न च मनोहरैव अनेन चतुर्थविशेषणात् । उक्ताया ब्रह्मसृष्टेर्वैलक्षण्यं वाङ्निर्मितेराह । **एतदिति** । वक्तीति वाक् शब्दः । उच्यते इति वाक् अर्थः । उच्यतेऽनयेति वाक् अभिधा (दि ?) व्यापाराश्च । तन्निर्मितिः । उक्तादुत्कर्षादेव जयतिशब्दः प्रयुक्त इत्याह **अत एवेति** । ननु नमस्कार एव विघ्ननिरास(क)त्वेन प्रसिद्धः नतु सर्वोत्कर्षेण स्तुतिरित्याशंक्याह **जयत्यर्थेनेति** । यत्र सर्वोत्कृष्टत्वं नमस्कार इत्यविनाभावात् इत्यर्थः । भारती नमस्कार इत्यनन्व-यमाशंक्य सामर्थ्यसिद्धिमत्त्वमाह **तां प्रति अस्मीति** । अस्मै च विकरणं प्रणत इति । ननु प्रारिप्सितग्रंथस्य प्रयोजनमभिधानीयं तत्परित्यज्य काव्यस्य प्रयोजनाभिधानमसंगतमित्याशंक्य लक्ष्यस्य काव्यस्य प्रयोजनान्येव तल्लक्षणभूतस्य ग्रंथस्य प्रयोजनानीति मत्वाह **इहाभिधेयं इति** । इह शास्त्रे काव्यमभिधेयं, यशःप्रभृतीनि प्रयोजनानि लभ्यंत इत्येतद्दृष्टान्तेनोपपादयति **कालि-दासादीनामिव यश** इति । श्रीहर्षादे राज्ञः सकाशाद्धावकादीनां । (मयूरादीनां) कवीनामनर्थः कुष्ठरोगादिस्तस्य । शृंगारादेरास्वादनमनुभवः तज्जनितलौकिकानंद इव दुःखसंसर्गोपि स्यादित्या-शंक्याह **विगलितेति** । अस्तमितानि रसव्यतिरिक्तवेद्यानि यत्र । तमेवंविधमानंदं करोति काव्यमित्युत्तरत्रान्वयः । तथा चाक्तं **भरतेन** । पाठ्यादथ ध्रुवागानात्ततः संपूरिते रसे । तदास्वाद-भरैकाग्रो हृष्यत्यंतर्मुखः क्षणं ॥ ततो निर्विषयस्यास्य स्वरूपावस्थितौ निजः । व्याप्नुते ह्लादनिष्पंदो येन हृष्यंति योगिन इति ॥ पाठ्यादिति काव्यात् ध्रुवादिगीतगानाच्च । कांतेत्यादि व्याचष्टे **प्रभुसंमितेत्यादि** । प्रभुसदृशेभ्यः शब्दप्रधानेभ्यः श्रुतिस्मृत्यादिभ्यः, मित्रसदृशेभ्योर्थतात्पर्यवद्भ्यः पुराणन्यायादिभ्यः इतिहासेभ्यश्च विलक्षणं । वैलक्षण्ये हेतुमाह **शब्दार्थयोरिति** । अर्थो

वाच्योर्थः। गुणभावः अप्राधान्यं। तत्र हेतुमाह **लोकोत्तरेति**। अलौकिकस्य रसादेर्वर्णनायां निपुणं यत्कवेः कर्म तत्काव्यं कामिनीव सरसत्वापादनेन सांमुख्यं विधाय विधिनिषेधात्मकमुपदेशं करोति। चकार उक्तप्रयोजनसमुच्चयार्थः। ततश्च एतानि प्रयोजनानि कर्मभूतानि। काव्यकर्तृ-कवेः काव्यार्थविचारदक्षस्य च करोति। कथं करोतीत्याकांक्षायामाह **यथेति**। योगमौचित्यमन-तिक्रम्येत्यर्थः। औचित्यं चैवं यशोर्थानर्थकृतेश्च द्वयोरपि। व्यवहारोपदेशौ च सहृदयस्यैव, निर्वृत्तिर्द्वयोरपि निर्वृतिसमये कवेरपि सहृदयत्वात्।इति काव्यमित्यादेर्विधिसमन्वयाभावादपरिपूर्त्ति-माशंक्य पूरयति **इति सर्वथेति**। इतिशब्दो हेतौ प्रयोजनवत्तयेत्यर्थः। नन्वेवंविधस्य काव्यस्यो-त्पत्तिरेव न संभवत्युपायाभावादित्याशंकायां तदुपायप्रतिपादकमुत्तरं पद्यमित्याह **अस्येति**। अस्य काव्यस्य। शक्तिपदार्थमाह **शक्तिरिति**। कवित्वस्य बीजं प्रतिभा तद्रूपः पूर्ववासनावि-शेषः। तथा च **वामनः** कवित्वबीजं प्रतिभानमिति। ननु शक्तिरेव नास्ति तत्सद्भावे प्रमाणाभावादित्याशंक्य कार्यलिंगकमनुमानमस्तीत्याह **यां विनेति**। ननु शक्तिं विनापि काव्यमुत्पद्यत इत्याशंक्य उत्पन्नमपि लोकोत्तरेत्याद्युक्तलक्षणायोगादाभासरूपमित्यभिप्रेत्याह **प्रसृतं चेति**। निपुणताख्यद्वितीयहेतुं व्याचष्टे **लोकस्येति**। लोकदर्शनस्य कर्तुम-शक्यत्वादुपचाराल्लोकशब्देन लोकवृत्तं गृह्यत इत्याह **स्थावरेति**। वृत्तमाचरणम्। काव्यकरणोप-युक्तानि शास्त्राणि दर्शयति **शास्त्राणामिति**। छंदसः **पिंगलादिविरचितात्** अनुष्टुबादि-वृत्तसंदेहनिरासः। व्याकरणात्पाणिनीयादेः शब्दशुद्धिः। आदिशब्दाद्दंडनीत्यादि ततः नयापनयादि-ज्ञानं। अभिधानशास्त्रात्पदार्थनिर्द्धारः। कलाशास्त्रात् शै(नृ?)त्यादेः कलातत्त्वज्ञानं। चतुर्वर्गेति धर्मादिप्रतिपादकाच्च तत्स्वरूपपरिज्ञानं। काव्यानामिति रामायणादेर्महाकाव्याल्लक्षणपरिचयः। आदिग्रहणार्थमाह **आदीति**। इतिहासाद्भारतादेः पूर्ववृत्तादिज्ञानं एतेषां विमर्शनाद्या व्युत्पत्तिः सा निपुणतेत्यर्थः। काव्यज्ञेति तृतीयं हेतुं व्याकरोति **काव्यं कर्तुमिति**। समुदिताकारद्योतकत्वेनेति शब्दं व्याकरोति **इतीति**। तदुद्भव इति व्याकरोति **तस्येति**। समुल्लासः सौन्दर्य्यं। हेतुशब्दः सामग्रीवचन इत्याह **हेतुरिति**। एकैकहेतुवैकल्प्ये उत्तमकाव्योत्पत्त्यदर्शनात्प्रत्येकहेतुत्वमसंगत-मित्याह **ननु हेतव** इति। **तददोषावित्यादिना** सामग्री नोच्यते तस्याः प्रतिपादितत्वात् शब्दार्थव्यतिरेकेण काव्यस्यासंभवाच्च। नापि लक्षणं तस्य सालंकृतौ (तिके?) काव्ये (व्या?) वृत्तेरव्यापकत्वात् इत्याशंक्याह **एवमस्यति**। अस्य काव्यस्य एवमसाधारणं रूपं स्वरूपलक्षणमित्यर्थः। **तददेनेन** लक्ष्यं काव्यमुच्यते इतरलक्षणं। तत्र शब्दः काव्यमित्युक्ते समुद्रघो-पादावतिव्याप्तिः। अर्थ इत्युक्ते द्वायदौ (द्रव्यादौ?)। उभयोर्ग्रहणेपि श्रुतिकटुत्वादिदोषयुक्तं कार्त्तार्थ (७ उल्लास) मित्यादावतिव्याप्तिः अत उक्तं **अदोषाविति**। तथापि माधुर्यादिगुणरहितेऽति-व्याप्तिस्तदर्थमुक्तं **सगुणाविति**। तथा गामानयेत्यादावतिव्याप्तिस्तदर्थमुक्त**मनलंकृतीति**। नञ् ईषदर्थे अनुदारा कन्येत्यत्र यथा। तौ अस्फुटालंकारयुक्तौ इत्यर्थः। दोषादिनिरूपणमंतरेण काव्यस्य निरूपणं न संभवतीत्यत आह **दोषेति**। श्रुतिकटुत्वादयो दोषाः। गुणाः रससमवायिनो धर्माः। अलंकारा रससंयोगवृत्तयः। अत एवाव्याप्तिः परिहृतेति वदन् **क्वापीत्येत**द्व्याकरोति। क्वापीति अलंकारसत्त्वमात्रस्य विवक्षितत्वादुभयत्रापि नाव्याप्तिरित्यर्थः। दोषस्य निंद्यत्वेपि काव्यत्वम-स्तीति दर्शयति **तथेति**। काचिन्नायिका रेवारोधसि कृतसंकेता पर(म)पुरुषरतिमपह्नुवाना वयस्यां प्रत्याह। यः प्रथमसंभोगेन कौमारं हृतवान् स एव प्रेयान्। ता एव चैत्रमासरात्रयः। विकसित-मालतीपुष्पसुगंधयः प्रौढाः रत्युद्दीपकाः त एव धूलीकदंबवायवः। अन्यकदंबानां वसन्तेऽसंभवात्

अहमपि सैवास्मि अहमित्यर्थेस्मीति निपातः। एवमत्र रत्युद्दीपकतादीनां सद्भावेपि तत् (त्र?) अनुभूते नर्मदातीरे वेतसीतरूणां अधोभागे रतिव्यापारलीलाकरणे विषये मन उत्सुकं भवति। अत्र वरादिसामग्र्यां सत्यां उत्कंठालक्षणकार्यानुत्पत्तिरिति विशेषोक्तिरलंकारः। सामग्र्यां सत्यां कार्यानुत्पत्तिरिति तस्य लक्षणं। स चास्फुटः कार्यानुत्पत्तिकोटेरकथनात्। रेवातीरे चोक्तकारणाभावेपि उक्तकार्योत्पत्तिरिति विभावनालंकारः। कारणाभावे कार्योत्पत्तिरिति तल्लक्षणं। अयमप्यस्फुटः रेवारोधसि सामग्र्यभावकोटेरवर्णनात् इत्यभिप्रेत्याह **अत्रेति**। ननु रसस्य प्रतीयमानत्वात् रसवदलंकारः किमिति नोच्यते इत्याशंक्याह **रसस्य हीति**। प्रधानभूतो रसः (अलंकार इत्यसं) गतमित्याशंक्याह (नालंकारतेति)। **तद्भेदानिति**। तस्य काव्यस्य विशेषान्। **क्रमेणेति** इदमुत्तममतिशयिनीत्यादिना शब्दचित्रमित्यन्तेन कथयतीत्यर्थः। वाच्यार्थात् अतिशयश्चमत्कारः अस्मिन्नस्ति तस्मिन्। [एकाक्षरकृतो जातेरिति द्रवोनिषेधे दंतादनालेश्च पायिको निषेधः दंडचकार्येत्यादिप्रयोगदर्शनात्?] आतिशायिनि व्यंग्ये सति इदं काव्यं उत्तमं भवति। एतदेव बुधैः पंडितैर्ध्वनिरित्युक्तं। श्लोकगतेदंशब्दार्थमाह **इदमितीति**। ननु शब्दार्थरूपं काव्यं ध्वनिर्बुधैरुक्तः इत्येतन्नोपपद्यते यतो बुधैरेव वैय्याकरणैः केवलस्यैव शब्दस्य ध्वनिरिति व्यवहारः कुत इत्याशंक्य, परिहरति **बुधैरिति**। प्रधानभूतो यः स्फोटः तद्रूपं यद्व्यंग्यं तद्व्यंजकस्य शब्दस्य ध्वनयतीति व्युत्पत्त्या ध्वनित्ववत् अर्थस्यापि ध्वनयतीति व्युत्पत्त्या ध्वनित्वमंगीकृतमेव तुल्यन्यायत्वादित्यर्थः। वैय्याकरणैरर्थस्य ध्वनित्वेन कुत्रचिद्व्यवहारात् तदंगीकृतिः कथं ज्ञायत इत्यत आह **तत** इति। यतः तैरंगीकृतं अतः कारणात् वैयाकरणानुसारिभिरन्यैरपि बुधैर्न्यग्भावितमुपसर्जनीकृतं वाच्यं येन तस्य व्यंग्यस्य व्यंजनसमर्थं यत् शब्दार्थयुगलं तस्य ध्वनिरिति व्यवहारः कुत इत्यनुषज्यते। तुल्यन्यायत्वाद्वैयाकरणैरर्थस्यापि ध्वनित्वमंगीकर्त्तव्यं अतो बुधैर्ध्वनिः कथित इत्येतत्संगतं इत्यर्थः। उत्तमकाव्यस्य लक्षणमुक्त्वा उदाहरणमाह **यथेति**। काचिन्नायिका नायकं प्रति प्रेषितां तेनोपभुक्तां स्वदूतीं सेर्ष्यमाह। हे दूति नायकसमीपं गतास्मीति मिथ्यावादिनि इतः मत्सकाशात्त्वं वापीं स्नातुं गतासि। तस्य अधमस्यांतिकं पुनर्न गतासि। मादृशस्य बांधवजनस्य पीडागमः दुःखप्राप्तिस्त्वया न ज्ञायते। वापीं स्नातुं गतासीति कुतोवगमः इत्याकांक्षायामाह। स्तनयोः तटं स्थलं निःशेषं यथा तथा च्युतं चंदनं यस्मात्। अधरश्च नितरां मृष्टोऽपगतो रागो यस्य। नेत्रेच दूरं अत्यर्थं अभिद्यमानाञ्जने। तथा तन्वी कृशा इयं तनुः संजातरोमांचा च। अत्राधमपदसहायानां व्यंजकत्वमभिप्रेत्याह **अत्रेति**। तत्रैव तात्पर्यात्प्राधान्यं। गाढालिंगनेन च्युतं नतु क्षालितं, चुंबनेन नितरां मृष्टो नत्वीषच्चुंबनेन। अत्यर्थमनंजने न त्वीषत्। तनुत्वे म्लानत्वे संति पुलकितत्वं नतु पुलकितत्वमात्रं। दूतीमप्युपभुक्तवानित्यधमत्वं। अत्र स्नातुं गतासीति विधेः काका निषेधप्रतीतेः, न पुनर्गतासीति निषेधात् काका तत्रैव गतासीति विधिप्रतीतेर्वाच्याद्व्यंग्यस्य चमत्कारः। उत्तमकाव्यं सोदाहरणं लक्षयित्वा मध्यमकाव्यस्य लक्षणमाह **अतादृशीति**। अतादृशीत्यस्यार्थमाह **वाच्यादिति**। व्यंग्ये वाच्याच्च अतादृशि अनतिशयिनि सति काव्यं मध्यमं तदेव गुणीभूतव्यंग्यं इति कथितमित्यनुषज्यते। तस्योदाहरणमाह। **ग्रामतरुणमिति** कश्चित्कंचित्प्रत्याह। ग्रामशब्देन तत्र एवैकोतिशयेन कामुक इति द्योत्यते। नववंजुलमंजर्य्या संयुक्तकरं मुहुर्मुहुः पश्यंत्यास्तरुण्या नितरां मुखकांतिर्म्लिना भवति। अत्र भवतीति वर्त्तमानव्यपदेशेन वैवर्ण्यस्याविरामः सूच्यते। स्वयं संकेतकरणात् स्वस्य तत्रागमनात् पुरुषस्य तत्र गमनाच्च मुखवैवर्ण्यमित्यर्थः। अत्र गुणीभूतं व्यंग्यं किमित्याकांक्षायामाह **अत्रेति**। व्यंग्यं नववंजुलमंजरीत्यादिपदेनेत्यर्थः। तदपेक्षया व्यंग्यापेक्षया

कामुकदर्शनेन कामिन्याः मुखविकाशस्य संभाव्यस्य विरोधस्यैव चमत्कारित्वात् । अधमकाव्यं लक्षयति **शब्दचित्रमिति** । चित्रशब्दार्थमाह **चित्रमितीति** । गुणा माधुर्यादयस्ते रसधर्मा अपि उपचारात् शब्दगुणा अर्थगुणा इत्युच्यते । तथा च वक्ष्यति ‘ गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मते’ति । शब्दालंकाराः अनुप्रासादयः अर्थालंकारा उपमादयः । तैर्युक्तं । अव्यंग्यमित्यस्यार्थमाह **अव्यंग्यमिति** । अर्थो व्यंग्यरूपः । अवरं अधमं । अव्यंग्यमधममित्येतावल्लक्षणमितरद्विभागपरं । तत्र शब्दचित्रमुदाहरति **स्वच्छंदेति** । मंदाकिनी वः मंदतां जडतां अह्नाय क्षिप्रं भिद्यात् अपनयतु । कीदृशी गंगा । स्वच्छंदेन स्वेच्छया । उच्छलंत्यः । अच्छा निर्मलाः । कच्छदेशेषु जलप्रायदेशानिभ्रस्थलेषु । च्छातेतराः स्थूलाः । अंबुच्छटाः जलकल्लोलास्ताभिर्मूर्च्छन्नश्यन्मोहो येषां तैर्महर्षिभिर्हर्षेण विहितं स्नानमाह्निकं च यस्यां सा । पुनः कीदृशी । उद्यंतः उदाराः बहवः दर्दुराः मंडूका यासु ताश्च ता दर्यश्च ताभिः दीर्घेषु अदरिद्रेषु समृद्धेषु द्रुमेषु द्रोहोद्रेको येषां ते च ते महोर्मयश्च तैर्मेदुरः अधिको मदो यस्याः । अत्र वृत्त्यनुप्रासेन वैचित्र्यं । यद्यपि मंदाकिनीविषयो रत्याख्यो भावो व्यंग्योस्ति तथापि अनुप्रासे कवेस्तात्पर्यात्तिरोधीयते । अत्र ओजोलक्षणे व्यंग्ये प्रतीयमाने सत्यपि काव्यस्य गुणाव्यभिचारात्तद्व्यतिरिक्तस्यैव व्यंग्यस्य प्रतीयमानत्वं विवक्षितं । अन्यथा काव्यत्वस्यैव हानिः । वाच्यचित्रमुदाहरति **विनिर्गतमिति** । यदृच्छयाप्यात्ममंदिरात् विनिर्गतं यं उपश्रुत्य अमरावती ससंभ्रमेण इंद्रेण द्रुतं पातिता अर्गला यस्यां एवंविधा सती भयेन निमीलिताक्षी (व भा) ति । कीदृशं आश्रितानां बहुमानं ददाति रिपूणां चाभिमानं दातीति वा मानदं । अत्र उत्प्रेक्षारूपे अर्थालंकारे कवेस्तात्पर्यात्संतो धीरादयो व्यंग्यास्तिरोधीयन्ते । **इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां प्रथम उल्लासः ॥**

द्वितीय उल्लासः ।

प्रथमोल्लासे शब्दार्थौ काव्यमित्युक्तं तत्र कतिविधः शब्दः कतिविधो वार्थ इत्याकांक्षायां तद्विभागप्रतिपादनपरत्वेन उत्तरश्लोकमवतारयति **क्रमेणेति** । उद्देशक्रमेण स्वरूपं विशेषरूपं विभागमित्यर्थः । नन्वर्थशास्त्रादौ व्यंजकशब्दव्यवहाराभावात् कथं त्रैविध्यमित्याशंक्य श्लोकगतात्रशब्दार्थमाह **अत्रेतीति** । व्यंग्यस्यैव रसस्य प्रतिपादके काव्ये व्यंजकशब्दोऽवश्यंभावीति त्रैविध्यमुचितमिति भावः । वैयाकरणैः स्फोटं प्रति शब्दस्य व्यंजकत्वश्रवणात्काव्यग्रहणमुपलक्षणं । ननु विभागानंतरं वाचकादीनां लक्षणं वाच्यं तत्परित्यज्य वाच्यादय इत्यादिना अर्थविभागः कथं क्रियत इत्याशंक्य शब्दविभागानंतरं तत्सहचरितार्थविभागं जिज्ञासमानस्यावश्यवक्तव्यत्वेन तदनंतरं साक्षात्संकेतितमित्यादिना कथयिष्यतीत्याह **एषामिति** । तदर्थाः तेषां वाचकादीनामर्थाः । क्रमेण वाच्यलक्ष्यव्यंग्या इत्यर्थः । कैश्चिद्वादिभिरन्यस्तात्पर्यार्थोप्यंगीक्रियत इत्याह **तात्पर्यार्थोपीति** । केषुचिन्मतेषु । एतदेव स्पष्टयति **आकांक्षेत्यादिना** । आकांक्षा प्रतिपत्तुर्जिज्ञासा । साकांक्षानां योग्यानामेकबुद्ध्युपारूढत्वं संनिधिः । योग्यता बाधकप्रमाणविरहः । एतादृशां जात्यादिर्जातिरेवेत्यादि वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये संकेतग्रहणमात्रप्रतीयमानात्पदार्थादाकांक्षादिकारणत्रयेण प्रतीयमानो विशेषवपुर्भिन्नस्वरूपः पदार्थव्यतिरिक्तो वाक्यार्थोपि स्फुरति । शब्दार्थव्यतिरिक्तो वाक्यार्थोपि न पदार्थः । पदार्थवाक्यार्थयोर्भिन्नत्वेन प्रतीयमानत्वादिति प्रमाण-

मुक्तं । गामानय शुक्लां दंडेनेत्यादौ पदानि स्वार्थमभिधाय अन्वितानि भवंतीति ये वदन्ति तेऽभिहितान्वयवादिनः । बहुवचनेनायमेव पक्षः प्रामाणिक इति सूचितं । अभिहितान्वयवादिन इत्यनेन सूचितं पक्षांतरमाह । **वाच्य** इति । पदानि अन्वितानि भूत्वा पश्चाद्विशिष्टमर्थं कथयंतीति यो वदति सः अन्विताभिधानवादी तस्य मतमित्यनुषज्यते । अत एव वाक्यार्थो वाच्यः । एकवचनेनास्याप्रामाणिकत्वं । व्यंजकस्यैव काव्योपयोगित्वादितरयोरुपादानं किमर्थमित्याशंक्याह **सर्वेषामिति** । वाच्यलक्ष्यव्यंग्यानां । व्यंजकत्वमिष्यते । **प्रायश इति** । सर्वदा अपि शब्दात् वाच्यत्वादिकं । वाच्यलक्ष्ययोरर्थयोर्व्यंजकत्वेन तत्प्रतिपादकयोः शब्दयोरपि परंपरया काव्योपयोगादुपादानं युक्तमिति भावः । वाच्यादीनां व्यंजकत्वं क्रमेणोदाहरति **तत्रेति** । काचिद्दत्तसंकेता तत्र जिगमिषुः व्याजोक्त्या श्वश्रूं प्रति कथयति **मातरिति** । अनेन सुखानुज्ञानार्था प्रियोक्तिः । घरोवअरणं गृहोपकरणं तंडुलादि । अनेनावश्यकर्त्तव्यत्वं सूच्यते । हु खलु । णत्थित्ति नास्तीति । साहिअं कथितं । तुमए त्वया । अनेन मया व्याजो नोत्पादित. इति सूच्यते । ता तस्मात् । भण अनेन प्रेरणार्थः सूच्यते । किं करणिज्जं किं करणीयं । एमेअ एवमेव । वासरो वासरः ठाइ तिष्ठति । अनेन सायंकाले मम पतिव्रताया गमनेऽचित्तं इत्यात्मनः शुद्धत्वं द्योत्यते । त्वरया प्रेरयति वा । अत्र किं व्यंग्यं इत्याकांक्षायामाह **अत्रेति** । प्रमाणांतरावगतव्यभिचारिणीरूपवक्तृवैशिष्ट्यात् वाच्यार्थो व्यंजक इत्यभिप्रायः । काचिन्नायका स्वप्रियोपभुक्तां दूतीं प्रत्याह । सहि सखि । मज्झकए मम कृते । सुहअं सुभगं । **साहेन्ती साधयन्ती** प्रार्थयमानेत्यर्थः । णिच एदादेः इति सूत्रेण णिच् स्थाने अदादेशपक्षे साहन्तीत्यपि पाठांतरं । खणेखणे क्षणेक्षणे । दुम्मिआ दूना । असि । सम्भावणेहकरणिज्जसरिसअं सद्भावस्नेहकरणीयसदृशं । दाव तावत् । विरइअं विरचितं । तुमए त्वया । अत्र लक्ष्यं किं व्यंग्यं च किमित्याकांक्षायामाह **तत्रेति** । वाक्यस्य विपरीतलक्षणया शत्रुत्वं लक्ष्योर्थः । स च श्रोत्रीरूपबोद्धव्यविशेषाद्व्यंजक इत्यर्थः । काचित्कामुकं प्रति संकेतस्थलमेतदित्यभिप्रायेणाह । उअ पश्य । णिच्चलणिप्फन्दा निश्चलनिस्पंदा । वलाआ बलाका । भिसिणीपत्तम्मि बिसिनीपत्रे । रेहइ राजते । केव । णिम्मलमरगअभाअणपरित्थिआ निर्मलमरकतभाजनप्रतिष्ठिता । शंखशुक्तिव्व शंखशुक्तिरिव । चलनं शारीरो व्यापारः स्पंदोऽवयवव्यापारः इति न पौनरुक्त्यं । मरकतेत्यादिना न केवलं वर्णसाम्यं किंतु अचेतनत्वेन निष्क्रियत्वं च । अत्र व्यंग्यस्य व्यंजकत्वं दर्शयति **अत्रेति** । निःस्पन्दत्वेन वाच्येन विश्वासयुक्तत्वं व्यंग्यं । तेन जनरहितत्वं व्यज्यते । फलितमाह **अत इति** । प्रकारांतरेण आश्वस्तत्वस्य व्यंजकत्वमाह **अथवेति** । यदि त्वमत्राभूः तर्हि बलाकाया विश्वस्तत्वं नोपपद्यत इति भावः । अर्थस्वरूपकथनानन्तरं प्रागुद्दिष्टवाचकादीनां उपलक्षणावसर इति उत्तरं श्लोकमवतारयति**वाचकादीनामिति** । यः अर्थमभिधत्त इत्युक्ते लाक्षणिकादावतिव्याप्तिः तदर्थं संकेतितं इति । एवमप्यन्विताभिधानवादे गंगायां घोष इत्यादौ मुख्यार्थव्यवहिते तटादावपि संकेतसद्भावात्तत्रैवातिव्याप्तिरित्यत्र आह **साक्षादिति** । तावत्युच्यमाने एद्दहमित्यादौ चेष्टायामतिव्याप्तिः तत्परिहाराय शब्दप्रस्तावात् **यः शब्द** इति द्रष्टव्यं । यस्मिन्पक्षे लक्ष्ये संकेताभावः तत्र संकेतितमर्थं योभिधत्ते इत्येकं लक्षणं, यः साक्षादभिधत्ते इति द्वितीयं । अभिधत्त इति प्रतिपादयतीत्यर्थः । नत्वभिधया बोधयतीति अभिधया प्रतिपादको वा वाचकव्यापारोभिधेत्यन्योन्याश्रयप्रसंगात्, संकेतविप्रतिपत्तिं निराकुर्वन् श्लोकं व्याकरोति **इहेत्यादिना** । इह लोकव्यवहारे । अगृहीतसंकेतस्याप्यर्थमात्रप्रतीतिरस्तीति तन्निवृत्तये विशेषग्रहणं । संकेतो नाम शब्दार्थयोः संबंधा-

वधारणं । शब्दस्य संकेतितार्थाभिधायकत्वं सकलसंकेतितार्थज्ञानमंतरेण न संभवतीति संकेतितमर्थं विभजते **संकेतित इत्यादिना** । संकेतविषयः कृतः संकेतितः । आदिशब्देन गुणक्रियायदृच्छा-शब्दा गृह्यंते । ननु व्यक्तिरेव संकेतितार्थो युक्तः अर्थक्रियाकारित्वेन पुरुषप्रवृत्तिनिवृत्तियोग्यत्वा-दित्याशंक्याह **यद्यपीति** । ननु सर्वासु व्यक्तिषु संकेतः कतिपयासु वा । तत्राद्यं । निराकरोति **आनंत्या-दिति** । द्वितीयं निराकरोति **व्यभिचारादिति** । व्यभिचारः संकेतितार्थव्यतिरिक्तेपि गवि गोव्यवहारः । इतिशब्दः तद्युक्तेर्व्यक्तिरित्येव न व्यवह्रियेतेत्यर्थः । चकारः उक्तदोषसमुच्चयार्थः । उक्तमर्थमुपसंहरति **तदुपाधाविति** । तस्या व्यक्तेरुपाधिर्विशेषणं जात्यादौ शब्दप्रवृत्तिनिमित्तं इत्यर्थः । जात्यादीनां भेदं वक्तुं उपाधिं विभजते **उपाधिश्चेति** । वस्तुधर्मो वस्तुनो नैसर्गिको धर्मो वक्त्रा स्वेच्छया आरोपितो धर्मः । वस्तुधर्म्ममपि विभजते **वस्तुधर्म** इति । सिद्धमपि विभजते **सिद्धोपीति**। आद्यः पदार्थस्य **प्राणप्रद** इति । प्राणप्रदां जातिं विना वस्तुनः स्वरूपमेव न सिद्ध्येदित्यर्थः । जातेः प्राणप्रदत्वे संमतिमाह **उक्तं हीति** । स्वरूपेण पिंडमात्रेण गौर्गौरिति व्यवहर्त्तुं न शक्यते अतिप्रसंगात् । नाप्यगौरिति व्यवहर्तुं अगोव्यावृत्तत्वात् । अतो गोत्वजातियोगादेव । पदार्थस्य प्राणप्रद इव । प्राणप्रदां जातिं विना वस्तुनः स्वरूपमेव न सिद्ध्येदित्यर्थः । शुक्लादेर्गुणस्य विशेषाधानहेतुत्वं कथयति **शुक्लादिना हीति** । अनेन उत्पन्नस्य द्रव्यस्य पश्चाद्गुणेन विशेषणमिति दर्शितं । अतो जातिगुणयोर्महान् भेदः । साध्यस्य लक्षणमाह **साध्य इत्यादिना** । पूर्वापरीभूताः अधिश्रयणादयोऽवयवाः अस्याः पचनादिक्रिया तद्रूपः । **वक्तृयदृच्छेत्यादिना** उक्तं चतुर्थमुपाधिं विशदयति **डित्थादीति** । स्वरूपं स्फोटस्वरूपं अंत्यवर्णबुध्या नितरां ग्राह्यं पूर्वपूर्वबुध्या तु ईषद्ग्राह्यं । अंत्यबुध्या स्फुटतरावभासनात् संहृतक्रमं स्फोटस्यैकत्वाद्वा संहृतक्रमं । इतिशब्दो हेतौ द्वितीयस्तु जात्यादिविभागपरिसमाप्तिद्योतकः । उक्तेर्थेसम्मातिमाह **गौः शुक्ल इति** । प्राणप्रदत्वं नाम जातिलक्षणं काणादैर्गुणत्वेन पठितेष्वणुत्वा-दिषु अतिव्यापकमित्याशंक्यते । तेषां संकेतमात्रं तत् । वस्तुतस्तु परमाणुव्यवहारः परमाणुत्व-जातियोगादेवातो नातिव्यापकमित्याह **परमाणुत्वादीनामिति** । अथवा विशेषाधानहेतुर्गुण इत्यव्यापकं लक्षणं अणुमहद्दीर्घ ह्रस्वं चेति कणादेन गुणत्वेनाभिमतानां अणुत्वादीनां नित्यत्वेन विशेषाधायकत्वाभावादित्याशंक्य तेषां वस्तुतो गुणत्वाभावान्नाव्यापकत्वमित्याह **परमाणुत्वादी-नामिति** । परमाण्वादीनामिति पाठे भावप्रधानो निर्देशः । नन्वेकत्वाज्जातेरुपाधित्वमस्तु गुणादी-नामुपाधित्वे प्रतिवस्तुभिन्नत्वादानंत्यादिदोषास्तदवस्था इत्याशंक्याह **गुणेति** । आश्रयभेदाद्भिन्न इव प्रतीयते परमार्थतस्तु एक एव शुक्लादिर्गुणः सर्वत्रेत्यर्थः । तदुक्तं 'कर्मैकं जातिरप्येका जगत्येकः सितो गुण' इति । एकस्योपाधिवशादनेकविधत्वप्रतीतौ दृष्टांतमाह **यथेति** । मुकुरो दर्पणः । भेद इव लक्ष्यत इत्यनुषज्यते । जात्यादिरित्येतदुपपाद्येदानीं जातिरेवेति पक्षमुपपादयति **हिमपयः इत्यादिना** । बाल्यशुकाद्युच्चारणभेदेन भिन्नेषु डित्थशब्देषु डित्थशब्दत्वं (सा) मान्यमस्ति तदेव पिंडे आरोप्यते तड्डित्थशब्दाभिधेयमित्यर्थः । अर्थेऽपि जातिमाह **प्रतिक्षणमिति** । प्रति-क्षणभिन्नेषु पिंडेपु स्वाभाविकं डित्थत्वं सामान्यमभिधेयमित्यर्थः । एतत्तु वैनाशिकमतानुसारेण प्रत्यहं कारणसंभेदात् शरीरांतरमिति वैशेषिकमतानुसारेण वा । जातिरेववेति पक्षमुपसंहरति । **इतीति** । ननु मतांतराणामपि सत्त्वात्तानि कुतो नोपन्यस्तानीत्यत आह **तद्वानिति** । जातिमान् जातिमत्तया धृतं वस्तु पदार्थ इति नैयायिकाः । अपोह इतरव्यावृत्तिः संकेत इति बौद्धैरुक्त इत्यर्थः । प्रयोजनसद्भावे गौरवमप्यंगीकार्यमित्यत आह **प्रकृतेति** । मतद्वयोपन्यासेनैव संकेतितसाकल्य-प्रतीतेर्मतान्तरोपन्यासो व्यर्थ इत्यर्थः । वाचकं शब्दमभिधाय लाक्षणिकं विवक्षन् तदुपयुक्त-

लक्षणालक्षणोपयोगित्वेन मुख्यार्थमाह **स इति** । नाभिधा समयाभावात् इत्यादौ अभिधाव्यवहार-
दर्शनाद् मुख्यार्थनिरूपणप्रस्तावे तां लक्षयति **तत्र मुख्य इति** । श्लोकस्थस्य स इत्यस्य
चार्थमाह **स इति** । **अस्येतीति** च अत्र साक्षात्संकेतिते अर्थे शब्दस्य व्यापारोऽभिधेत्येतावल्लक्षणं ।
मुख्य इति वक्ष्यमाणारोपितलक्षणापेक्षयोक्तं । अन्यथा साक्षात्संकेतितेर्थे शब्दस्य
व्यापारांतराभावान्मुख्यग्रहणमनर्थकं स्यात् । लक्षणाया लक्षणमाह **मुख्यार्थेति** ।
मुख्यार्थबाधयोगाभ्यां अन्योर्थो लक्ष्यते प्रतिपाद्यत इति यत्सा लक्षणेत्येतावल्लक्षणं ।
नन्वेवं सति यच्छब्देन लक्ष्यत्वपरामर्षः स्यात् । न ह्येषा लक्षणा । लक्ष्यत्वं लक्ष्यधर्मः लक्षणा तु
लक्षकधर्म इति चेत् न । यच्छब्देन लक्ष्यत इत्याख्यातार्थगुणीभूतं प्रतिपादनमात्रमेव परामृश्यते । प्रति-
पादनं तु प्रतिपादकधर्म एव अतो नोक्त दोषः । अथवा यत् यतो व्यापारात् अन्योर्थो लक्ष्यते सा
लक्षणा । सेति प्रतिनिर्दिश्यमानलिंगोपादानं, रूढितोवा प्रयोजनादिति लक्षणाविभागपरं । रूढि-
लक्षणा प्रयोजनलक्षणा चेति विभागः । नतु लक्षणांतर्भूतत्वं तथात्वे एकैकस्यांतर्भावेऽव्याप्तिः
उभयान्तर्भावे त्वसंभवः । लक्षणवाक्यमुदाहरणनिष्ठत्वेन व्याकरोति **कर्मणीत्यादि** । कुशान् लाति
आदत्ते इति कुशल इति मुख्योर्थो निपुणे न संभवतीत्याह **दर्भग्रहणेति** । प्रयोजनलक्षणायामपि
मुख्यार्थबाधं दर्शयति **गंगायां घोष इति** । व्याकरोति **विवेचकत्वादाविति** रूढिलक्षणायां सामी-
प्यादि (प्रयोजनलक्षणायां ?)। रूढित इत्यस्यार्थः प्रसिद्धेः प्रसिद्धः । प्रयोजनमाह **तथेति** ।
येषां पावनत्वादीनां तथा अतिशयेन न प्रतीतिः । तथातिशयेन प्रतिपादनरूपात् । आरोपिता
क्रियेत्येतद्व्याचष्टे **स इति** । यद्यपि गंगायां घोष इत्यत्र गंगाशब्देन प्रत्यायितं स्रोतस्तीरं लक्षय-
तीत्यर्थव्यापारो लक्षणा, न शब्दव्यापारस्तथापि वाच्यधर्मः वाचके शब्दे आरोप्यते । अतः शब्दो लाक्ष-
णिक इत्यर्थः । आरोपिते हेतुमाह **सांतरार्थनिष्ठ** इति । अंतरं व्यवधानं तेन सह वर्त्तते व्यवहितस्तीरादिः ।
स हि मुख्येन व्यवधीयते अतस्तीरादिविषयो व्यापारो मुख्यार्थगत एव । नतु निवृत्तव्यापार-
गंगादिशब्दगतः । अतः शब्दे न संभवतीति तत्रारोप्यत इत्यर्थः । विभागाभावाद्रूढिलक्षणामुपेक्ष्य
प्रयोजनलक्षणा विभजते **स्वसिद्धय इति** । प्रयोजनलक्षणा द्विविधा शुद्धा गौणीच । शुद्धा उपादान
लक्षणा लक्षणलक्षणा चेति द्विविधोक्ता । स्वसिद्धये पराक्षेपः इत्युपादानं, परार्थे स्वसमर्पणं इति
लक्षणं । उपादानलक्षणामुदाहरणमुखेन व्याकरोति **कुंता इति** । ततः कारणात्कुंतानामात्मोपादाने-
नैव प्रवृत्तत्वादुपादानलक्षणा अजहत्स्वार्थेत्यर्थः । अत्र प्रयोजनं बाहुल्यप्रतीतिः । कुन्तिनः प्रविश-
न्तीत्युक्ते कुन्तानां बाहुल्यप्रतीतिर्न स्यात् । केचित्तु गौरनुबंध्य इत्यादिकं उपादानलक्षणाया
उदाहरणमाहुः तन्मतं दूषयितुमनुवदति **गौरिति** । श्रुतेः प्रभुसंमिततया बंधनस्यावश्यकर्त्तव्यतां
दर्शयति **श्रुतीति** । स्वबंधनसिध्यर्थं जात्या (व्यक्तिराक्षिप्येत ?)।(अभिधा) व्यक्तिरूपं विशेष्यं धर्मिणं
न गच्छेत् । कुतः विशेषणे जातिरूपे धर्मे क्षीणशक्तिः विरतव्यापारा इति परमतमनूद्य तदसंगतमिति
प्रतिजानीते **इतीति** । तत्र हेतुमाह **नह्यत्रेति** । कुंताः प्रविशंतीत्यत्र बाहुल्यप्रतीतिवत् अत्र न
किंचित्प्रयोजनमस्तीत्यर्थः । तर्हि रूढिः स्यात्तत्राह **नचेति** । निर्वचनाभावरूपबाधाभावादित्यर्थः । यद्येवं
बाढं तर्हि व्यक्तिप्रतीतिरत आह **व्यक्तीति** । लक्षणांविना(अविना)भावेनैवाक्षेप इत्यत्र उदाहरणा-
न्याह **यथेति** । प्रविश गृहं, पिंडीं भक्षयेत्यर्थः । पीनो देवदत्त इत्यत्रापि लक्षणां विनाविनाभावेनै-
वाक्षेप इत्याह **पीन इति** । यद्यपि भोजनाभावसाहितं पीनत्वमनुपपन्नं, रात्रिभोजनस्य पीनत्वस्य
च कार्यकारणसंबंधः, दिवाभोजनरहितोऽप्ययं दीन इति पुरुषवैशिष्ट्याादि प्रयोजनं च विद्यते
तथापि श्रुतार्थापत्तेर्विषयत्वेन मुख्यार्थबाधासंभवान्नेयं लक्षणेत्याभिप्रायः । दृष्टः श्रुतो वार्थोन्यथा
नोपपद्यत इति तदुपपादकार्थकल्पनमर्थापत्तिः । उपादानलक्षणां निरूप्य लक्षणलक्षणामुदाहरति

गंगायामिति । सूत्रस्थं परार्थमित्येतद्व्याकरोति **तटस्येति** । स्वसमर्पणमित्येतद् व्याकरोति **गंगाशब्द इति** । स्वसमर्पणं नाम जहत्स्वार्थत्वं । लक्षणेन स्वार्थसमर्पणेन उपलक्षणाल्लक्षणेत्यर्थः । शुद्धैवेत्येतद्व्याकरोति **उभयरूपेति** । शुद्धत्वे हेतुमाह **उपचारेणेति** । भिन्नत्वेन प्रतीयमानयोरैक्यारोपणमुपचारः यथा गौर्वाहिक इत्यत्र । अमिश्रत्वमेव प्रतिपादयति **अनयोरिति** । उपादानलक्षणस्वरूपयोर्भेदयोः लक्ष्यस्य तीरादेर्लक्षकस्य गंगादेर्भेदरूपं पूर्वोक्तोपचारलक्षणं ताटस्थ्यमिह नास्तीत्यर्थः । ताटस्थ्याभावेनैव प्रयोजनसिद्धिं सिसाधयिषुः अन्वयं तां च दर्शयति **तटादीनामिति** । प्रतिपादने कृते तत्त्वप्रतिपत्तिरभेदज्ञानं भवतीति शेषः । तेन भिन्नत्वेन प्रतीयमानत्वं निरस्तं । तस्यां च सत्यां अत्यंतपावनत्वादिप्रयोजनसिद्धि. । व्यतिरेकं दर्शयति । गंगासंबंधमात्रप्रतीतौ मुख्यशब्दात् लक्षणाया विशेषाभावान्न प्रयोजनसिद्धिरित्येवमुपचारेण (अ?) मिश्रत्वमित्यनयोरित्यादिग्रंथं व्याकुर्वंति तदसंगतं । भिन्नत्वेन प्रतीयमानयोरैक्यारोपणरूपोपचारामिश्रितत्वस्य गौरयमिति साध्यवसानभेदे विद्यमानत्वेन तस्यापि शुद्धत्वप्रसंगात् । ननु तत्र गुणयोग एवोपचारः । अत्र पूर्वोक्त एवोपचारस्तदमिश्रत्वं शुद्धत्वमिति चेत् शुद्धत्वे अनुगतनिमित्ताभावप्रसंगात् । नन्वैक्यारोपणमुपचारस्तदमिश्रत्वं शुद्धत्वमिति चेत् आयुर्घृतं आयुरेव वेदमिति वक्ष्यंमाणयोः शुद्धयोः सारोपासाध्यवसानभेदयोरारोपिततादात्म्ययोः शुद्धत्वाभावप्रसंगः । तस्मादेवं व्याख्यानं कर्त्तव्यं । उपचारो नाम गुणयोगस्तदमिश्रत्वं शुद्धत्वं । अतएव वक्ष्यमाणौ गौर्वाहीको गौरयमिति सारोपासाध्यवसानभेदौ । जाड्यमान्द्यादिना गुणेन मिश्रत्वात् । अनयोर्लक्षणलक्षणोपादानव्यतिरेकेण भेदकान्तरमस्तीति कश्चित्तन्मतं दूषयति **अनयोरित्यादिना** । गंगायां घोष इत्यत्र लक्षकं तटस्थं । ताटस्थ्यं नाम लक्षकस्य स्रोतसः गंगाशब्दबोध्यकोटिनिवेशाभावः । कुंताः प्रविशंतीत्यत्र लक्ष्यं तटस्थं । लक्ष्याणां कुन्तिनां ताटस्थ्यं नाम कुंतशब्दबोध्यकोटिनिवेशाभावः । प (रं ?) तु ताटस्थ्यं अनयोर्भेदयोर्भेदरूपं भेदकं न भवतीत्यर्थः । तत्र हेतुमाह **तटादीनामिति** । प्रतिपादने कर्त्तव्ये प्रयोजनसिद्ध्यर्थं तादात्म्यप्रतीतिरंगीकर्त्तव्या । तथा च ताटस्थ्यं नास्तीत्यर्थः । तादात्म्यप्रतिपत्तौ प्रयोजनसिद्धिरित्यन्वयमाह **तत्त्वप्रतिपत्तौ हीति** । व्यतिरेकमाह **गंगेति** । संवध्यत इति संवंधं तीरं कर्म्मणि यत्र तन्मात्रप्रतीतावित्यर्थः । नन्वस्मिन्पक्षे जहत्स्वार्थरूपस्य लक्षणस्य तुल्यत्वात् लक्षणलक्षणासाध्यवसानलक्षणयोः को भेदः । अयं भेदः । गौणे साध्यवसाने सादृश्यनिबंधनत्वं, लक्षणभेदे तु तदभावः । शुद्धेपि साध्यवसाने आयुरेवेदमित्यादौ आरोप्यमाणगतस्य पा(जी?)वनत्वादेः फलरूपत्वमित्यर्थः । प्राभाकरास्तु लक्षणावृत्तेर्गौण्याश्च भेदं कथयन्ति तन्मतं निराकुर्वन् उपचारमिश्रां चतुर्भेदत्वेन निरूपयितुमाह **सारोपेति** । तथाशब्दः समुच्चये । सारोपेति लक्ष्यनिर्देशः । अन्येति शुद्धलक्षणातो भेदः । तमेव भेदं तुशब्दद्योत्यं दर्शयति । **अनपह्नुतभेदाविति** अनपह्नुतभेदावित्यनेन साध्यवसानाया भेदं दर्शयति । सारोपत्वनिर्वाहाय तथाशब्दद्योत्यमर्थमाह **सामान्याधिकरण्येनेति** । मिश्रलक्षणाया एव भेदांतरमाह **विषय्यंतरिति** । व्याकरोति **विषयिणेति** । निगीर्ण इति आत्मपरिशेषीकृततादात्म्य इति यावत् । निगरणेन विषयविषयिणोरभेदप्रतिपत्तिरध्यवसानं तेन सह वर्त्तत इति साध्यवसानिका । अनयोरेव प्रत्येकं द्वैविध्यं दर्शयति **भेदाविमाविति** । सादृश्याद्गौणौ संबंधान्तरतः शुद्धौ । व्याकरोति **इमाविति** । गौर्वाहीक इति सारोपा गौणी । वाहीको नाम देशविशेषः तत्रत्यः पुरुषोपि वाहीकः । गौरयमिति साध्यवसाना गौणी । अत्र वाहीकादौ गवादिशब्दप्रवृत्तिनिमित्ते वादिनां प्रतिपत्तिं दर्शयति **अत्र हीति** । स्वस्य गोशब्दस्यार्थो गोत्वं पिंडाकृतिर्वा तत्सहचारिणा गोशब्देन लक्ष्यमाणः

परार्थो वाहीकादिः । गोशब्दः वाहीकशब्देन सह अनुपपद्यमानः सामानाधिकरण्येन बाधित-मुख्यार्थः सन् स्वाभिधानपुरःसरं स्वार्थसहचारिजाड्यादिगुणान् लक्षयित्वा तानेव निमित्तीकृत्य तत्सदृशवाहीकगुणद्वारेण वाहीके उपचारितस्तमभिधत्त इत्यर्थः । अस्मिन् पक्षे प्रवृत्तिनिमित्तस्य लक्ष्यमाणत्वं । व्यधिकरणत्वं । गोशब्दास्यासंकेतितवाहीकार्थाभिधायकत्वं चेति त्रितयमयुक्तं इत्यरुच्या पक्षांतरमाह **स्वार्थसहचारीति** । गोशब्दाभिहितार्थो गवादिः स्वसमवेत-जाड्यादिगुणाभेदेन वाहीकगतान् गुणान् लक्षयति । नतु गोशब्दो वाहीकमभिधत्त इत्यर्थः । अस्मिन्पक्षे लक्षकस्य गोशब्दार्थस्य लक्ष्यस्य वाहीकगतजाड्यादेश्च संबंधो न संभवति । गुणैक्यं संबंध इति चेत् न । विकल्पासहत्वात् । तत्किं तुल्यगुणत्वं तुल्यगुणवत्त्वं वा । नाद्यः लक्षकस्य गवादेर्द्रव्यत्वेन गुणत्वाभावात् , नापि द्वितीयः लक्ष्यस्य जाड्यदेर्गुणत्वेन गुणवत्त्वाभावात् । किं च जाड्यादिगुणमात्रप्रतीतौ गौर्जाड्यमिति प्रयोगप्रसंग इत्यरुच्या स्वाभिमतमदुष्टं पक्षमाह **साधारणेति** । गोवाहीकयोः साधारणा गुणा जाड्यादयस्तदाश्रयणरूपेण संबंधेन गोशब्दो वाहीकं लक्षयतीत्यर्थः । अत्राह गवादिशब्दप्रवृत्तौ साधारणाश्रयत्वं निमित्तं अतो नोक्तदोषावकाशः । उक्तेर्थे संमतिमाह **उक्तंचेति** । अभिधेयेन स्रोतसा संबद्धस्तटादिस्तत्प्रतीतिस्तत्प्रत्यायकत्वं स्रोतसो धर्मः । उपचारामिश्रत्वेन शुद्धा लक्षणेत्यर्थः । उपचारमिश्रां गौणीमाह **लक्ष्येति** । पद्यार्धं प्रथमे पक्षेपि गवादावेव लक्ष्यमाणैर्द्वितीये तु वाहीकादौ वृत्तिर्गौणी लक्षणेति स्वमत-संमतित्वेन व्याकर्त्तव्यं । तु शब्दो विशेषद्योतकः । अविनाभावपदं व्याकरोति **अविनाभाव** इति । येन विना यन्न भवति तन्नांतरीयकं । अंतरं विना तन्न भवन्नांतरीयकं । गेहादित्वाथः स्वार्थेकः । एवं संबंधमात्रांगीकारे दोषमाह **तत्त्वेहीति** । अविनाभावेंगीकृते सतीत्यर्थः । मंचानामचेतनत्वेन मुख्यार्थक्रोशनस्यासंभवेन सिद्ध्यर्थं पुरुषलक्षणे कृते सा न स्यात् । मंचपुरुषयोरविनाभावाभावा-दित्यर्थः । अविनाभावांगीकारे दोषांतरमाह **अविनाभावे** चेति । गौरनुबंध्य इत्यादिप्रस्तावे उक्तमित्यर्थः । आयुर्घृतमिति शुद्धसारोपस्योदाहरणं आयुरेवेदमिति शुद्धसाध्यवसानस्यो-दाहरणमिति दर्शयन् पद्यस्थं संबंधांतर इत्येतद्व्याकरोति **आयुर्घृतमिति** । प्रथमादिशब्दात् इंद्रार्था-स्थूणा इत्यादि । द्वितीयात् तादर्थ्यादिगुणाभावेन शुद्धत्वात्कथं मिश्रितत्वं तत्राह **एवमादाविति** । गुणाभावेन शुद्धत्वेपि आयुषः करणे घृते कार्यकरणभावसंबंधपूर्वकत्वेन कार्यभूतायुष्युपचारेण प्रवृत्ते आरोपाध्यवसाने इत्युपचारमिश्रत्वमित्यर्थः । शुद्धभेदाभ्यां सकाशाद्गौणभेदयो(र्विशेषं) दर्शयति **अत्रेति** । गौर्वाहीको, गौरयमित्यनयोरुदाहरणयोर्गोवाहीकयोर्भेदेपि प्रथमे गोभूयस्त्वप्रतीतिर्द्वितीये सर्वथाऽभेदावगमः प्रयोजनं । गौणभेदाभ्यां शुद्धभेदयोर्वैलक्षण्यं दर्श-यति **शुद्धेति** । तत्र आयुर्घृतमित्यत्र वैलक्षण्येन क्षीरादिवैसादृश्येन, आयुरेवेदमित्यत्र घृतं क्षीरादिवत् आयुष्यं न व्यभिचरतीति अव्यभिचारेण कार्यकारित्वमिति विवेकः । कार्यकारणभावादिलक्षणेत्यत्र आदिशब्दसंग्राह्यान्संबंधानाह **क्वचिदित्यादि** । उपचारो व्यवहारः । तदुदाहरति **यथेति** । अत्रेष्टार्थप्रदायकत्वं व्यंग्यं । राजकीयः पुरुषो राजेत्यत्रानुलंघ्यशासन-त्वादिकं व्यंग्यं । हस्तावयवेन हस्तव्यापारं विदधति सामर्थ्यादि व्यंग्यं । तच्चेत्यत्र तत्कर्मनिपुण-त्वादि व्यंग्यं । सुखावबोधार्थमुक्तभेदान्परिगणयति **लक्षणेति** । लक्षणा प्रयोजनलक्षणेत्यर्थः । तेन उक्तप्रकारेण । अनंतरोक्तं भेदचतुष्टयमेव प्रतीयते कथं षड्विधेत्याशंक्य व्यवहितं भेदद्वयं स्मारयति **आद्येति** । तेन षड्भेदा उपादानलक्षणा (लक्षणलक्षणा), गौणसारोपा, गौण साध्यवसाना, शुद्धसारोपा, शुद्धसाध्यवसाना चेति । व्यंग्यरहिता रूढिलक्षणा एका । उक्तंषड्विधा

प्रयोजनलक्षणा गूढागूढव्यंग्यत्वेन द्वादशविधा। एवं लक्षणायास्त्रयोदशविधत्वं दर्शयति **साचेत्या-**
दिना। प्रयोजनलक्षणायाः नियमेन व्यंग्यसहितत्वं प्रतिपादयति **प्रयोजनं** हीति। लक्षणायाः
प्रकृतत्वात् तच्चेत्यसंगतमित्याशंक्याह **तच्चेति** । अन्विष्यमाणं यद्विद्वद्भिरेव प्रतीयते तद्गूढं।
प्रयोजनलक्षणायाः गूढव्यंग्यमुदाहरति **गूढं यथेत्यादिना** । कश्चिद्युवा कांचिद्युवतिमालो-
क्याह। चंद्रवदनाया वपुषि तारुण्यस्योद्गमो मोदते उज्जृभते । तमेवोद्गमं दर्शयति
मुखमिति । विकासेन पुष्पधर्मेण तत्रासंभवता असंकुचितत्वसंबंधा(त्सा)तिशयत्वं लक्ष्यते, सौर-
भादि व्यंग्यं। स्वाधीनकृतं चक्रत्वं येन तत्प्रेक्षणं, वशीकरणेन चेतनधर्मेण स्वाभिमतविषये
प्रवृत्तिरूपेण संबंधेन स्वाधीनत्वं लक्ष्यते, उचितपुरुषाभिलाषित्वं व्यंग्यं । बहुविलासागतिर्गमनं,
अत्र समुच्छलितत्वेन उद्गमरूपेण मूर्तधर्मेण कार्यकारणभावसंबंधाद्बाहुल्यं कारणं लक्ष्यते, समस्त-
तरुणहरिणवागुरत्वं व्यंग्यं संस्था मर्यादाबुद्धिः। मर्यादात्यागेन चेतनधर्मेण कार्यकारणभावसंबंधा-
दस्थैर्यं लक्ष्यते। पूर्वं मौग्ध्याद्गुर्वादिसमीपे प्राणेशविषयेपि धृतमर्यादा संप्रति धाष्टर्याात्तत्याग इत्यस्थैर्यं।
अनुरागाधिक्यं व्यंग्यं। वक्षः कठिनस्तनं। मुकुलितत्वेन पुष्पधर्मेण निबिडावयत्वसंबंधात्काठिन्यं
लक्ष्यते। आलिंगनयोग्यत्वं व्यंग्यं। अंसबंधेन मांसलत्वेन उद्धुरं उत्कटं। अत्र उद्धुरत्वेन उत्कान्तधुर-
त्वेन वृषभादिधर्मेण पीनत्वसादृश्यसंबंधादुत्कटत्वं लक्ष्यते। मनोहरत्वकामाय(त)नत्वादि व्यंग्यं।
इंदुर्वदनं यस्या इत्युपचारो यदा तदा इंदुशब्दः बाधितमुख्यार्थः। स च सुवृत्तत्वादिगुणयोगाद्वदनं
लक्षयति। विरहितापोपशांतिर्व्यंग्यं। उद्गमः उदयः अंकुरादिधर्मः तरुणिम्नि अनुपपन्नः अत
उद्गमशब्दो बाधितस्वार्थः सन् नवोद्भेदसाम्यात् तारुण्यं लक्षयति, सर्वजनाह्लादकत्वं व्यंग्यं।
मोदनेन कार्यकारणसंबंधादनियंत्रितत्वं कारणं लक्ष्यते, स्पृहणीयत्वं व्यंग्यं। निमित्तांतरादपि भवता
समुच्छलनादिबाहुल्यादिना धूमादेरिव व्याप्त्यभावाल्लक्षणैवांगीकार्या । अगूढं व्यंग्यमुदाहरति
अगूढं यथेति । लक्ष्म्या अतिशयितसंबंधान् मूर्खा अपि चतुरचरित्राणां ज्ञातारः चतुरव्यापारान्
विदन्ति। कर्मणि षष्ठी। उक्तमर्थमर्थांतरन्यासेन साधयति **उपदिशतीति**। कामिनीनां तारुण्यमद
एव विलासान् शिक्षयति। एवं श्रीपरिचयोपि चातुर्यं शिक्षयतीत्यर्थः। अत्रोपदिशतीति अगूढव्यं-
ग्यमिति शेषः। उपदेशेन च अज्ञातज्ञानस्य [विशेषेण सामान्यविशेषभावसंबंधादज्ञातज्ञापनं
सामान्यं लक्ष्यते, अनायासेन शिक्षणं व्यंग्यं। उपदेशशब्देनैव शिक्षादानप्रकटनात् शिक्षारूपव्यंग्यस्य
वाच्यायमानत्वेनाचमत्कारकारित्वात् अगूढव्यंग्यत्वमित्यर्थः। स्थूलमार्गेणोक्तं वैचित्र्यमुपसंहरति
तदेवेति। तत्तस्मात् कथिता उक्ता एषा लक्षणा। रूढौ व्यंग्यरहितत्वेन प्रयोजने (गूढा) गूढव्यंग्यत्वेन च
त्रिविधेत्यर्थः। तद्व्याकरोति **अव्यंग्येति**। प्रसंगतः सावान्तरभेदां लक्षणां निरूप्य तद्द्वारा पूर्वोद्दिष्टं
लाक्षणिकशब्दं लक्षयति **तद्भूरिति**। स्याद्वाचकेति सूत्रस्थं दूरव्यवहितं शब्दं शब्दविशेष्यत्वेनानु
स्मारयति शब्द इति। तद्भूरिति व्याचष्टे **तदिति** तस्या लक्षणायाः आश्रयः। प्रवाहस्य लक्षणा-
श्रयत्वेन उपचारात्तद्वाचकोयमपि लक्षणाव्यापाराश्रय इत्यर्थः। वाचकलाक्षणिकौ शब्दौ लक्षयित्वा
व्यंजनामुखेन व्यंजकं लक्षयितुं व्यंजनास्वरूपमाह **तत्रेति** । तत्र पावनत्वादौ प्रयोजने विषय
इत्यर्थः। उत्तरसूत्रं हेतुत्वेनावतारयति **कुत इति** । यस्य प्रयोजनस्य ज्ञानार्थं लक्षणाश्रीयते।
अत्रेति तस्मिन् प्रयोजने शब्दादेवैकस्मात् ज्ञेये। अन्यथा लक्षणाया मूलहानिरेव स्यात्। एतेन
शब्दैकगम्यत्वे लक्षणोपास्तिरेव हेतुत्वेनोक्ता भवति। पद्यं व्याकरोति **प्रयोजनेति**। अपरो व्यापा-
रोऽभिधा लक्षणा वा न संभवतीत्यमुमेवार्थं प्रतिपादयति **तथाहि**। **नाभिधेत्यादि**। समयः संकेतः।
सूत्रं व्याचष्टे **गंगायामिति** । तत्पावनत्वादौ । हेत्वभावादिति सूत्रपदं व्याचष्टे **मुख्यार्थेति**।

मुख्यार्थबाधः संबंधः प्रयोजनसद्भावश्चेति हेतुत्रयं। तदभावं प्रतिपादयति तथा चेति। लक्ष्यं तटादि गंगाशब्दस्य मुख्यार्थो न अत्र मुख्यार्थे। तटादौ घोषाधिकरणत्वासम्भवरूपो बाधोपि नास्ति। एतेन आद्यो हेतुर्निरस्तः। प्रयोजनेन पावनत्वादिना तटादेर्मुख्यार्थस्य बाधोपि नास्ति। अनेन द्वितीय-हेतुर्निरस्तः। प्रयोजनस्य लक्ष्यत्वाभावे हेत्वंतरमाह **नचेति**। स्खलंती बाधादित्रयसव्यपेक्षा गतिरव-बोधनशक्तिर्यस्य शब्दस्य। मुख्यार्थबाधादित्रयसव्यपेक्षत्वेन बोधकत्वं स्खलद्गतित्वमित्यभिप्रायः। सूत्रं व्याचष्टे **यथेत्यादि**। पावनत्वाद्यैरिति प्रतिपिपादयिषितैरत्यन्तपावनत्वाद्यैरित्यर्थः। पावन-त्वादीनां संबंधस्तत्टस्यास्त्येव। न च शब्दः स्खलद्गतिरिति व्याचष्टे नापि **गंगाशब्द** इति। यथायं शब्दस्तटं प्रतिपादयितुमसमर्थः बाधादित्रयसापेक्षः तथा प्रयोजनं प्रतिपादयितुमसमर्थो न भवतीति व्यतिरेके दृष्टांतः। असामर्थ्यं नामान्यापेक्षत्वं। अन्यापेक्षे असमर्थ इति प्रयोगदर्शनात्। पूर्वं प्रयोजनस्य लक्ष्यत्वमेव नास्तीत्युक्तं इदानीं लक्ष्यत्वेपि दूषणमाह **एवमिति**। सूत्रं व्याचष्टे **एवमपीति**। सप्रयोजनं प्रयोजनान्तरेण सहितं लक्ष्यं, तदपि प्रयोजनान्तरसहितं लक्ष्यमित्यर्थः। मूलक्षयकारिणीत्येतद्व्याचष्टे **प्रकृतेति**। एकस्या लक्षणाया असिद्धौ पूर्वपूर्वलक्षणानामसिद्धिः स्यात्ततश्च मूललक्षणाया अप्यसिद्धिकारिणीत्यर्थः। ननु न केवलं प्रयोजनं लक्ष्यते किं तु प्रयोजनसहितं तटादीत्यतो नोक्तदोषप्रसंग इत्येतच्छंकानिराकरणपरत्वे-नानन्तरसूत्रमवतारयति **नन्विति**। प्रयोजनविशिष्टस्य लक्ष्यत्वे प्रयोजनांतरं वाच्यमित्याशंक्याह **गंगायास्तट** इति। अधिकस्यार्थस्य पावनत्वादेः। चकारो भिन्नक्रमः। पावनत्वादि लक्ष्यं प्रयोजनं चेत्यर्थं। प्रतिज्ञातेर्थे उत्तरं सूत्रं हेतुत्वेनावतारयति **कुत** इति। सूत्रं व्याकरोति **प्रत्यक्षादेरिति**। ज्ञाय-तेऽनेनेति ज्ञानं प्रमाणं इत्यभिप्रेत्योक्तं। प्रत्यक्षादेरिति भाट्टमतानुसारेण ज्ञेयधर्मः फलमित्युक्तं, वैशे-षिकमतानुसारेण संवित्तिर्ज्ञातृधर्मः फलमित्युक्तं। उक्तं विशिष्टस्य लक्ष्यत्वाभावमुपसंहरति **विशिष्ट इति**। विशिष्टे लक्षणा नैवमित्येतद्व्याकर्त्तव्यमित्यशंक्याह **व्याख्यातमिति**। व्याख्यातप्रायमित्यर्थः। लक्ष्यत्वप्रयोजनत्वयोर्भिन्नविषयत्वेन तदुभयमेकस्य न संभवतीति भावः। ननु पावनत्वादयो यदि न लक्ष्यास्तर्हि कथं ज्ञायंत इत्याशंक्याह **विशेषा** इति। पावनत्वादयो विशेषाः लक्षिते तटादौ व्यंजनव्यापारेण गम्याः स्युरित्यर्थः। सूत्र व्याकरोति **तटादिति**। विलक्षणशाब्दव्यवहारादपि लक्षणाया व्यंजनस्य भेदं दर्शयति **तच्चेति**। अर्थगतव्यंजना प्रतिपादितेति उक्तानुवादपूर्वकं शब्दगतव्यंजनाप्रतिपादनपरत्वेनोत्तरं सूत्रमवतारयति **एवमिति**। अनेकार्थस्य अनेके अर्था वाच्य-त्वेन यस्य तस्य शब्दस्य संयोगाद्यैर्वाचकत्वे वाचिकायां शक्तौ नियमिते सति अवाच्यस्य व्यंग्यस्या-र्थस्य ज्ञानकृद्यो व्यापारः सा शब्दगता व्यंजना। संयोगादीनां वाचकत्वे संमतिमाह **संयोग** इत्यादि। अर्थविशेषस्यानवधारणेऽवधारणहेतव इत्यर्थः। सूत्रत्वभ्रमं निराकरोति **इत्युक्तदिशेति**। उक्तमार्गेण संयोगस्य निश्चायकत्वमुदाहरति **सशंखेति**। अत्र शंखादिसंयोगेन विष्णुर्निर्धार्यते। विप्रयोगस्योदाहरणं **अशंखचक्रो** हरिरिति। प्रसक्तिपूर्वकत्वात्प्रतिषेधस्य विष्णोरन्यत्र प्रसक्त्यभावाद्विष्णुरेवोच्यत इत्यर्थः। साहचर्यस्योदाहरणं **रामेति**। तयोः रामार्जुनयोरिव गतिर्लक्षणया विरोधः। अत्र विरोधात् परशुरामकार्त्तवीर्ययोरुभयोरपि निश्चयः। प्रयोजनस्य **स्थाणु**मिति। संसारविनाशनमीश्वरादन्यत्र न संभवतीतीश्वर एवेत्यर्थः। प्रस्तावस्य **सर्वमिति**। लिंगस्य चिह्नस्य **कुपित** इति। कुपितत्वं लिंगं समुद्रस्य कोपाभावात्। अन्यशब्दसांनिध्यस्य **देवस्येति**। **पुरारातेरिति** सान्निध्याद्देवः शिव-एवेत्यर्थः। सामर्थ्यस्य **मधुनेति**। कोकिलमदने सामर्थ्यं वसन्तस्यैव न मद्यादेरित्यर्थः। औचित्याः **पात्विति**। इष्टप्राप्तानिष्टनिवृत्त्याद्यनेकार्थत्वेपि दृष्टिप्राप्तेरेवौचित्यात्सामुख्यं। देशस्य **भातीति**। अत्र

राजधान्यां। कालस्य चित्रेति। चित्रभानुशब्दस्यानेकार्थत्वेपि दिने रवौ प्रयोगात्सूर्यवह्न्योर्निश्चयः। व्यक्तेः पुंनपुंसकादेः **मित्रमिति** । मित्रशब्दस्यानेकार्थत्वेपि सुहृद्वाचकत्वे नपुंसकलिंगः, सूर्यवाचकत्वे पुल्लिंगः । स्वरस्य उदात्तादेः **इंद्रेति** । इंद्रशत्रुः शातयिता यस्येति बहुव्रीहौ । बहुव्रीहौ प्रकृत्याः पूर्वपदमिति प्रकृतिस्वरे शेषनिपाते आद्युदात्तत्वं ततो बहुव्रीहिनिश्चयः । इन्द्रस्य शत्रुर्यः स इति तत्पुरुषे समासस्यान्त्योदात्तत्वं शेषनिपातस्तत्र तत्पुरुषनिश्चयः । उदात्ताद्यपेक्षया **वेद एव न काव्य** इत्युक्तं । मथ्नामि कौरवशतमित्यादौ काकुस्वरेणाप्यर्थावगतेरिष्टत्वात् । आदिशब्देन संगृहीतमर्थमाह **एद्दहमेत्थणिआ** । एतावन्मात्रस्तनी । एद्दहमेत्तेहिं अच्छिवत्तेहिं एतावन्मात्राभ्यामक्षिपत्राभ्यामुपलक्षितेत्यर्थः। एद्दहमेत्तावत्था एतावन्मात्रावस्था । एद्दहमेत्तेहिं दिअएहिं एतावन्मात्रैर्दिवसैः। अणुमहदाद्यनेकार्थाभिधायकत्वेपि एतावन्मात्रशब्दस्य अत्र प्रसारिततर्जनी(क,शिरश्चालनेनाभिनयेन दुर्बलावस्थत्वं गम्यते। बद्धमुष्टिभुजद्वयवलयीकरणेन स्थौल्यं गम्यते। मुकुलीकृतांगुलिकरद्वयस्य तिर्यक्कलनेन दिवसानां कतिपयत्वं । प्रसारितांगुलिकरयुगचालनेन बहुत्वं गम्यते। अतोभिनयोप्यनेकार्थस्य निग्राहक इत्यर्थः। उक्तानुवादपूर्वकं **अनेकेत्यादि** सूत्रं व्याकरोति **इत्थमिति**। तस्या अभिधार्थनियमनात्संयोगादिभिरित्यर्थः। शब्दगतव्यंजनमुदाहरति। **भद्रेति**। राजा कश्चिद्वर्ण्यते यस्य हस्तः सततं दोनोदकसेकसुंदरोऽभूत् । कीदृशस्य। भद्रात्मनः कुशलात्मनः। अनाक्रमणीयमूर्त्तेः । विस्तीर्णे वंशे कुले उन्नतिरभ्युदयो यस्य। कृतशरसंगस्य। अनुपप्लुता गतिर्यस्य। वैरिवारकस्य इति । मुख्यो वाच्योथः। इदानीं व्यंग्योर्थः ।यस्य हस्तः मदोदकसुभगोभूत् । परस्य उत्कृष्टस्य वारणस्य हस्तिनः। भद्रजातेः। अनाक्रमणीयस्य। विशाला वंशस्य पृष्ठवंशस्य उन्नतिर्यस्मिन्। कृतभ्रमरसंग्रहस्य। अनुपद्रुतगतेः। एवंविधस्य अत्र व्यंजनया गजप्रतीतिर्भवति। राज्ञो वाच्यत्वस्य प्रकरणेन नियमितत्वात । उक्तव्यञ्जनद्वारा व्यञ्जकशब्दं लक्षयति **तद्युक्त** इति । शब्दस्य व्यञ्जयकत्वेऽर्थस्यापि कथं व्यञ्जकतेत्यत आह **यत्स** इति । यद्यस्मात्कारणात् स शब्दः अर्थान्तरयुक्तः अर्थविशेषयुक्तः तथा व्यञ्जकोभवति अतः शब्दार्थोपि सहकारित्वेन व्यंजको मतः । अन्यथा अर्थस्यासहकारित्वे यस्य कस्यचिदर्थस्य यं कंचिदर्थं प्रति व्यंजकत्वं स्यादित्यर्थः । सूत्रस्थं तथा पदं व्याचष्टे **तथेतीति** । इति **श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां द्वितीय उल्लासः** ॥

तृतीयोल्लासः

शब्दगतां व्यंजनां प्रतिपाद्य उल्लाससंगतिप्रतिपादनपूर्वकं अर्थगतां व्यंजनां प्रतिपादयितुमारभते **अर्था इति**। व्याचष्टे **वाचकेति** । अर्थानां वाच्यादीनां व्यंजकत्वं प्रतिपाद्यत इत्यर्थः। व्यंजकत्वमेतेषां केन प्रकारेण भवतीत्याशंक्य तदुत्तरत्वेनोत्तरं सूत्रमवतारयति **कीदृशीति**। प्रतिभाजुषां विचारकाणामन्यार्थधीहेतुः व्यंग्यार्थधीहेतुः यो वाच्यादेरर्थस्य व्यापारः व्यक्तिरेव सा सा व्यंजनैव नाभिधादिः । व्यापारस्यान्यार्थहेतुत्वे हेतून्दर्शयति **वक्त्रित्यादिना**। क्वचित् वक्तृवैशिष्ट्यात्, क्वापि बोद्धव्यवैशिष्ट्यात्, प्रस्ताववैशिष्ट्यात्, देशवैशिष्ट्यात्, कालवैशिष्ट्यात् आदिग्रहणाच्चेष्टादिवैशिष्ट्यात् । वाच्यस्य व्यंजकत्वमुदाहरति **अइपिहुलमित्यादिना**। काचित्कृतोपपत्ति-

भोगा तच्चिन्तापल्लवाय सखीं प्रत्याह । सहि हे सखि । अइपिहुलं (अति) पृथुलं । जलकुंभं । घेत्तूण गृहीत्वा । तुरिअम् त्वरितं । समागदह्मि समागतास्मि । समसेअसलिलणीसासणीसहा अतः श्रमस्वेदसलिलनिःश्वासनिःसहा । खणं क्षणं । वीसमामि विश्राम्यामि । अत्र व्यंग्यं किमित्याशंक्याह अत्र **चौर्येति**। अत्र व्यभिचारिणी वदतीति वक्तृवैशिष्ट्यं । अत्र चान्यत्र प्रमाणांतरेणासतीत्वावगमे सति प्रतिभानवंतरतटस्थस्य व्यंग्यप्रतीतिर्भवतीति द्रष्टव्यं । बोद्धव्यवैशिष्ट्याद्व्यंजकत्वमुदाहरति । **ओण्णिद्दमित्यादि** । काचिन्नायिका स्वां दूतीं निजप्रियोपभुक्तां लक्षयित्वा कथयति । सहि सखि । मह मम । मंदभाइणीये मंदभाग्यायाः । केरं कृते । ओण्णिद्दं औन्निद्र्यं । दोब्बलं दौर्बल्यं । चिन्ताअलसत्तणं अलसत्वं । सणीससिअं सनिःश्वसितं । तुहवि त्वामपि । अहह परिहवइ परिभवति । व्यंग्यमाह **अत्रेति** । इहापराधित्वलक्षणबोद्धव्याया दूत्या वैशिष्ट्यं । काकुवैशिष्ट्याद्व्यंजकत्वमुदाहरति **तथाभूतामित्यादिना** । अत्र भीमः संधिं कुर्वता युधिष्ठिरेण प्रेषितं सहदेवं प्रति कथयति । नृपसदसि द्रुपदस्य तनयां द्रौपदीं तथाभूतां दुःशासनेन विवसनीक्रियमाणां विलोक्य वल्कलधारिभिरस्माभिर्वनचरैः सह बहुकालं वने स्थितं । तदनंतरं विराटस्य गृहे अयोग्यसूपकारादिव्यापारकरणेन प्रच्छन्नं यथा भवति तथा स्थितं । एवं खिन्ने मयि गुरुर्युधिष्ठिरः खेदं कोपं भजते, कौरवेषु खेदं नाद्यापि भजति । अत्र व्यंग्यमाह **अत्र मयीति** । ननु कुपितोद्धतनायकप्रयुक्तस्य वाक्यस्य केवलानुवादकत्वायोगाद्विधौ पर्यवसानं वक्तव्यं, तच्च काकुद्योत्यार्थेन विना न सिध्यतीति वाच्यसिद्ध्यंगं काकुः, अतो गुणीभूतव्यंग्यत्वमित्याशंक्य परिहरति **न चेति** । अनुल्लंघ्यत्वेन गुरुं प्रति कोपस्यासंभवात् प्रश्नमात्रेणापि वाक्यार्थघटनात् काकोरपि प्रश्नमात्रेणैव विश्रांतिः । तथा च मयि न युक्तः कुरुषु युक्तः कोप इत्यस्य प्रकाशनात् न काकुर्वाच्यांगमित्यभिप्रेत्य हेतुमाह **प्रश्नमात्रेणे**त्यादि । मथ्नामि कौरवशतमित्यत्र भीमे न मथ्नामीत्यसंभवात् काकुर्मथ्नाम्येवेति व्यंग्यविश्रांतिद्वारा काव्यार्थमुपपादयति गुणीभूतव्यंग्यत्वात् । इह तु व्यंग्यविश्रांतिं विनैव प्रश्नमात्रविश्रांतिद्वारा काकुः काव्यार्थमुपपादयतीति न गुणीभूतव्यंग्यत्वं । तस्मात् शब्दशक्तिरेव स्वार्थाभिधेयसामर्थ्याक्षिप्तकाकुसहाया सती व्यंग्यार्थप्रतीतिहेतुरित्यर्थः । वाक्यवैशिष्ट्याद्व्यंजकत्वमाह **तइआ महेत्यादि** । अत्र काचिन्नायिका निजसख्यामनुरक्तं स्वप्रियमीर्ष्यया कथयति । तइआ तदा । मह मम । गंडत्थलणिमिअं गंडस्थलनिमग्नां । दिट्ठिं दृष्टिं । अण्णत्तो अन्यतः । ण णेसि न नयसि । एण्हिं इदानीं । सच्चेअ सैव । अहं । ते अ तावेव । कवोला कपोलौ । णं न सा दिट्ठी दृष्टिः । णिमिअं निहितां । व्यंग्यमाह **अत्र मत्सखीमिति** । अत्र तदानीमन्या दृष्टिः इदानीमन्येत्येवंप्रकारस्य वाक्यवैशिष्ट्यं । वाच्यवैशिष्ट्याद्व्यंजकत्वमुदाहराति **उद्देश इत्यादि** । कश्चित्कामी कामिनीं प्रति वदति । हे तन्वि सरसकदलीपंक्तीनां शोभया अतिशयेन रमणीयः, कुंजानामाधिक्येनांकुरितो वर्द्धितो रमणीनां विभ्रमो येन एवंविधोयं नर्मदायाः प्रदेशः । किंच एतस्मिन्प्रदेशे सुरताभिलाषोद्दीपकास्ते वायवो वांति येषां अग्रे पुरस्तात् कलितः अकांडे अनवसरे कोपो येन सः कलिताकांडकोपः (मनोभूः) सरति । मानिनां मानभंगाय कुपित इत्यर्थः । व्यंग्यमाह **अत्र रतार्थमित्यादि** । अत्र उद्दीपनवातादिरूपवाच्यार्थस्य वैशिष्ट्यं । अन्यसंनिधिवैशिष्ट्याद्व्यंजकतामुदाहराति **णोल्लेइ इत्यादि** । संकेतकालप्रश्नाभिलाषिणं कामुकमुद्दिश्य सखीं प्रति काचिद्व्यभिचारिणी कथयति । मं मां । सअलम्मि सकले । घरभरम्मि गृहभरे । अणद्दमना अनार्द्रमनाः । अत्ता श्वश्रूः । णोल्लेइ प्रेरयति । जइ यदि । संझाइ संध्यायां । खणमेत्तं क्षणमात्रं । वीसामो विश्रामः । णव केवलं । होइ भवति । णव भवति न वा भवति । व्यंग्यमाह **अत्र संध्येति** ।

अत्र अन्यस्य सुरतसंकेताभिलाषिणः संनिधानवैशिष्ट्यादेवं व्यज्यते । संध्यायामवसर एवेत्युच्यमाने तटस्थस्य स्पष्टप्रतीतिर्माभूदिति न वेत्युक्तं । प्रस्ताववैशिष्ट्याद्व्यंजनामुदाहरति सुव्वईति । अत्र काचिदुपपतिं प्रति अभिसर्त्तुमुद्यतां सखीं कथयति । अज्ज अद्य । पहरमेत्तेण प्रहरमात्रेण । तुज्झ-तव । पिओ प्रियः । समागम्मिस्सदि समागमिष्यति । सुव्वइ एवं श्रूयते । एमेअ एवमेव । किंत्ति किमिति । चिट्ठसि तिष्ठसि । ता तस्मात् । सहि सखि । करणिज्जं करणीयं । सज्जेसु सज्जय । सम्यक् संपादयेति भावः । व्यंग्यमाह अत्रोपपतिमित्यादि । अत्रोपपत्यभिसरणरूपप्रस्ताववैशिष्ट्यं । देशवैशिष्ट्याद्व्यंजनामुदाहरति अन्यत्रेति । अत्र पुष्पावचयं नाटयंती मालती सखीः प्रति कथयति । यूयं पुष्पावचायं अन्यत्र कुरुध्वम् । भो सख्यः अत्र अस्मिन्प्रदेशे । अस्मीत्यहमर्थेऽव्ययं । अहं करोमि । अत्रैवाहं करोमीत्यर्थे हेतुमाह हीति । यस्मात् अहं दूरं गंतुमसमर्था न शक्ता । अयं अञ्जलिर्वः युष्मभ्यं रचितः । प्रसीदत प्रसन्ना भवत । व्यंग्यमाह अत्र विविक्त इत्यादि । प्रच्छन्नकामकोयं माधवो विसर्ज्य इति आश्वस्तां विश्वासवतीं कामंदकीं प्रति मालत्या व्यज्यते । अत्र विविक्तत्वलक्षणं देशवैशिष्ट्यं । उद्देशोयमित्यत्र सर्वत्र सर्वस्य वाच्यार्थस्य वैशिष्ट्यं इह तु देशस्यैवेति विशेषः । कालवैशिष्ट्याद्व्यंजनामुदाहरति गुरुअणेति । अत्र प्रतिष्ठासुं प्रियं प्रति काचित्कथयति । गुरुअणपरवस गुरुजनपरवश पिअ हे प्रिय । मंदभाइणी मंदभाग्या । अहकं अहं । तुह त्वां । किं भणामि । अज्ज अद्य । पवासं प्रवासं । वच्चसि व्रजसि । वच्च व्रज । सअं जेव्व स्वयमेव । करणिज्जं करणीयं । सुणसि जानासि । व्यंग्यमाह अद्य मध्वित्यादि । अत्र वसंतसमयलक्षणं कालस्य वैशिष्ट्यं । आदिग्रहणार्थं व्याचष्टे आदीति । चेष्टावैशिष्ट्याद् व्यंजकत्वमुदाहरति द्वारोपान्तेति । कश्चित्कामी नर्मसचिवं प्रति कथयति । द्वारसमीपसंनिहिते मयि तया सौन्दर्यसारलक्ष्म्या ऊरुयुगमं प्रोल्लास्य प्रसार्य्य मिथः समाश्लिष्टं कृतं । दूरस्थस्यैव प्रियस्य दूरात्स्वांगैः स्वांगान्येव मेलयित्वा स्पष्टकं नामालिंगनं क्रियते तदनेन सूचितं । शिरोंऽशुकं पुरतः आनीतं । अनेन गूढमानेच्छेति व्यज्यते । तदनंतरं वाचः प्रसरणं निवारितं मुखमुद्रणेनेत्यर्थः । अनेन तूष्णींभूते जने आगन्तव्यमिति । अनेन पारवश्यं ध्वन्यत इति केचिदाहुः । ततो भुजलते संकोचिते । अनेनागमनपारितोषिकमालिंगनं करोमीति व्यज्यते । व्यंग्यमाह अत्र चेष्टयेत्यादि । अत्र चेष्टाया ऊरुयुगप्रसारणादिरूपाया वैशिष्ट्यं । ननु द्वितीयोल्लासे वाच्यादीनामर्थानां व्यंजकत्वमुदाहृतं । एकस्मिन्नेवोदाहरणे वक्त्रादिवैशिष्ट्यमप्युदाहर्तुं शक्यते तत्किं पृथगुदाहरणेनेत्याशंक्याह निराकांक्षेति । सामान्येन पूर्वमुदाहृतेपि अस्योदाहरणं किं न प्रदर्शितमित्याकांक्षायां सत्यां प्रतिपत्तिर्निराकांक्षा न भवतीति तदर्थं वक्त्रादिवैशिष्ट्यादर्थानां पुनर्व्यंजकत्वमुदाहृतमित्यर्थः । अनवसरे संकोचोपि युज्यते सोपि नास्तीत्याह प्राप्तेति । एवं च वाच्यस्य वक्त्राद्येकैकवैशिष्ट्येन व्यंजकत्वमुदाहार्यं, वाच्यस्य वक्तृबोद्धव्याद्युभयादिवैशिष्ट्येनापि व्यंजकत्वं, लक्ष्यव्यंग्ययोश्च वक्त्रादिवैशिष्ट्येनापि व्यंजकत्वमुदाहार्यमित्याह वक्त्रादीनामिति । वक्त्रादीनां मिथः संयोगे सति द्विकत्रिकादिभेदो भवति । तत्र उदाहार्यमिति संबंधः । वक्तृबोद्धव्यादीनां मिथः द्वयोः संयोगे द्विकवैशिष्ट्यं इत्यादि ज्ञेयं । तत्र द्वयोर्वैशिष्ट्याद्व्यंजकस्योदाहरणं । अत्ता एत्थ णुमज्जइ एत्थअहं दिअसअं पुलोएसु । मा पहिअ रत्तिअंधअ सिज्जाइमाणु मज्जिहिसि । काचित्प्रोषितभर्तृका व्यभिचारिणी वसतिं प्रार्थयमानं संजातकामं पथिकं प्रति कथयति । पहिअ हे पथिक । अत्ता श्वश्रूः । एत्थ अत्र णुमज्जइ निषीदति । सा दूरे शेते सुप्ता च न ज्ञास्यतीत्यर्थः । एत्थ अत्र । समीप एवाहं । दिअसअं दिवसकं । संप्रति रतांतरकारी कुत्सितो दिवसः । पुलोएसु विलोकय । दिवसमध्य एव सर्वं द्रष्टव्यमित्यर्थः । रत्तिअंधअ रात्र्यंध रात्रौ शय्यावि-

मागानभिज्ञतया । सह आवयोरित्यर्थे निपातः । सिज्जाइ शय्यायां । मा णु सज्जिहिसि मा शयिष्ठाः । अत्र व्यभिचारिणीलक्षणं वक्तृबोद्धव्ययोर्वैशिष्ट्यं । तस्मान्मम शय्यायामेव पतेति व्यज्यते । अनेन क्रमेण पूर्वोदाहृतसाहंतीत्यत्र लक्ष्येऽर्थे वक्तृवैशिष्ट्यं, उअणिच्चलेत्यत्र व्यंग्ये वक्तृवैशिष्ट्य-मित्याद्युदाहार्यं । अर्थव्यंजकतोच्यत इत्यनेनार्थस्य व्यंजकत्वे तद्वाचकस्य शब्दस्य (कथं) व्यंजकत्वव्यपदेश इत्याशंक्य शब्दार्थयोरुभयोरपि व्यंजकत्वं प्रतिपादयितुमाह शब्देति । शब्दप्रमाणेन प्रतिपादितोर्थो वाच्यः लक्ष्यश्चार्थांतरं व्यंग्यलक्षणं व्यनक्ति यस्मात्तस्मात् अर्थस्य व्यंजकत्वे अर्थशक्तिमूले ध्वनौ शब्दस्य सहकारित्वं । विशिष्टशब्दाभिधेयतया विना अर्थस्य व्यंज-कत्वाभावात् सहकारितया शब्दोपि व्यंजक इति व्यपदिश्यत इत्यर्थः । शब्दप्रमाणेत्यादि व्याचष्टे **न हि प्रमाणेत्यादि** । ततः शब्दार्थयोरपि व्यंजकत्वं केवलमर्थस्यात्र मुख्यतामात्रमित्यर्थः । **इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायामर्थ-निर्णयस्तृतीय उल्लासः ।**

॥ इति शम् ॥

APPENDIX C.

THE COMMENTATORS.

प्रदीप :—Written by Govinda Thakkura (Lattar half of 15th century). Native of मिथिला, son of केशव and सोनोदेवी, in the रविकर family. Also wrote उदाहरणदीपिका to comment on the stanzas in the काव्यप्रकाश.

उद्योत :—Commentary on प्रदीप; written by नागोजी or नागेश भट्ट (Beginning of 18th century). Author of several other works.

प्रभा :—Commentary on प्रदीप written by वैद्यनाथ तत्सद् (Latter half of 17th century). Also wrote उदाहरणचन्द्रिका on the illustrative stanzas of the काव्यप्रकाश.

संकेत :—By राजानक रुय्यक or रुचक (Twelfth Century). Kashmirian; author of several works including अलंकारसर्वस्व.

बालचित्तानुरञ्जनी :—By नरहरि सरस्वतीतीर्थ (13th century). Belonged to the आन्ध्रदेश. Wrote the commentary at Benares. Author of a टीका on the मेघदूत and कुमारसम्भव.

Errata and Corrigenda.

—: o :—

Reference.	Page.	and Line.	Incorrect.	Correct.
Introduction	vi	29	Prabhakara's refinement	कुमारिल's refinement.
,,	xiii	30	Dhavani school	ध्वनि–School.
,,	xvi	8	But much realism	But too much realism.
Text	6	19	Sense-Poetry	Sense—Poetry.
,,	11	10	void of figures	Void of (obvious) figures.
,,	35	1	परमाण्वादीन	परमाण्वादीनां.
,,	46	9	nature of dissimilarity	nature of absence of identification.
,,	52	11	sach	such.
,,	54	3	अतथा	अतक्षा.
,,	56	1	व्यङ्ग्ये	व्यङ्ग्येन.
,,	58	9	Translation modified in the Notes.	
,,	63	10	tha blue	the blue.
,,	74	5–8	Translation modified in the Notes.	
,,	11	27	साङ्गो वेदाश्चिकित्सितम्	साङ्गो वेदश्चिकित्सितम्
Notes	19	35	It will found	It will be found.
,,	16	40	tenous	tenuous.
,,	,,	88	therof	thereof.
,,	22	4	वक्तोक्ति	वक्रोक्ति.
,,	27	29	leave an impression	not leave an impression.
,,	29	9	ध्वनि–school follows	ध्वनिवादिन्s follow.
,,	77	16	only कुन्तिनः the sense of	only the sense of कुन्तिनः
,,	88	18	word चार	word उपचार.
,,	,,	20	उपचारेण अभिश्रितत्वात्	उपचारेण अमिश्रितत्वात्.
,,	104	38	not विषय and ज्ञान	not फल and ज्ञान.

———